# प्रख्या

अप्रकाशितानामनुपलभ्यमानानां काव्यानां
शास्त्राणां सङ्ग्रहाय प्रयोजिता पुस्तकमाला

॥ द्वितीयः स्पन्दः ॥

प्रेमसम्पुटम्
घटकर्पर काव्यम्

R-509
R-510

सम्पादकः
राधावल्लभ त्रिपाठी

रू. 100

ISBN 81 85268 48 7

# प्रख्या

अप्रकाशितानामनुपलभ्यमानानां
काव्यानां शास्त्राणां सङ्ग्रहाय
प्रयोजिता पुस्तकमाला

॥ द्वितीयः स्पन्दः ॥

सम्पादकः
राधावल्लभः

प्रतिभा प्रकाशन
दिल्ली

प्रख्याया द्वितीयस्पन्दः
डॉ. हरीसिंहगौर विश्वविद्यालय संस्कृतविभागस्याधिकारे
देहलीस्थ प्रतिभाप्रकाशनेन प्रकाशितः

प्रथमं संस्करणम्
1996
ISBN : 81-85268-48-7
मूल्यम् :

**PRAKHYĀ** : A series of unpublished unavailable works in Sanskrit.
Vol. II., Ed. Radhavallabh Tripathi
Published by **Pratibha Prakashan**, 29/5, Shakti Nagar, Delhi-110007, under the authority of Sanskrit Department, Dr. H.S. Gour University Sagar
I Edn. 1996.

Rs.

# PREFACE

PRAKHYA was basically planned as the series devoted to the contemporary creative writing in Sanskrit and its first *spanda* was brought out in 1991. Later on, in was decided to widen the scope of the series and to bring if out on the lines of the *Kavyamala* series of Nirnaya Sagar Press and the *Malayamarutam* ed. by late Prof. V. Raghavan.

The second *spanda* of *Prakhya* contains *Premasamputam* an unpublished poem by Visvanatha Cakravarti, and *Ghatakarakavya* with two commentaries- the *Kulakavivrti* by Abhinavagupta and another unpublished commentary by Taracandra.

*Premasamputam* has been edited on the basis of two mss. - one from the library of Maharaja of Chhatarpur in Madhya Pradesh copied by my father late Prof Gokul Prasad Tripathi, and the other obtained from BORI, Pune. *Ghatakarpara* with Abhinavagupta's com. was published under Kashmir Series of Texts and studies in 1945 under editorship of Pt. Madhusudan kaul Shastri. The copy of the Ms. of the Com. by Taracandra was obtained from the BORI, Pune.

The author of Premasamputa-kavya, as he himself suggests in the last stanga of the poem, was a direct disciple of Rupagosvamin. Krishnamachariar in his History of Classical Sanskrit literature (P.289) informs that one Vis'vanatha Cakravartin had written a commentary on *Ujjavalanilamani* of Rupagosvamin. He refers to *Stavamrtalahari kavya* by this author. S.B. Varnekar in his " Samskrtavanmayakos;a " also refers to Vis'vanatha Cakravartin. Both Krishnamachariar and Varnekar however, do not refer to *Premasamputm*. From the last stanza of the poem, the period of its composition can be fixed as 1606 A.D.

*Premasamputam* is a delightful poem on the love between

Radha and Krishna. Krishna visits Radha in the disguise of a damsel and challenges the later to prove her love for Krishna himself. Despite some grammatical mistakes in the composition, the poem is remarkable for spelling out the philosophy of love.

We are thankful to the authorties of Bhandarkar Oriental Research Institute for making available the copies of the MSS.

Radhavallabh Tripathi

# भूमिका

प्रख्याया द्वितीये स्पन्देऽस्मिन् अद्यावध्यमुद्रितं कवि विश्वनाथचक्रवर्तिविरचितं प्रेमसम्पुटं नाम काव्यं प्रथमं प्रकाशमायाति । काव्यस्यास्य मातृकाद्वयं समुपलभ्यते

***क- मातृका-*** देवनागर्यक्षरैर्निबद्धेयं मातृका मध्यप्रदेशान्तर्वतिछतरपुरजनपदशासकानां पुस्तकालयेऽवर्तत । अतीतेषु त्रिंशद्वर्षेषु अस्मत्पितृपादैस्तत एवास्याः प्रतिलिपिः स्वहस्ताक्षरैर्व्यधायि । मूलमातृका प्रामाणिकी प्रायः त्रिशतवर्षपुरातनी प्रतिभाति । इयमेवेह आदर्शमातृकात्वेनगृहीता । अत्रपुष्पिकायावेनमि विश्वनाथचक्रवर्तीति सुस्पष्टं सूचितम् ।

***ख- मातृका-*** इयं मातृका बङ्गाक्षरैर्निबद्धा 531.1891–95क्रमाङ्किताभण्डारकर–प्राच्यविद्या शोधसंस्थाने उपलभ्यते ।

पीटर्सनेन " कैटलागस् कैटलोगोरम् " इति सूच्यां प्रेमसम्पुटकाव्यस्योल्लेखः कृतः रचनाकालः 1550 ई. रचयिता च रूपगोस्वामिशिष्यो विश्वनाथ चक्रवर्तीति सूचितम् ।

श्रीकृष्णमाचारी स्वसंस्कृतसाहित्येतिहासे श्रीधरभास्करवर्णेकरश्च संस्कृत वाङ्मयकोशे विश्वनाथचक्रवर्तिनं निरूपयतः परन्तु एतद्विरचितं प्रेमसम्पुटं नानयोर्ज्ञातम् । विश्वनाथश्चक्रवर्ती उज्ज्वलनीलमणिटीकां स्तवामृतलहरीकाव्यं च व्यरचयदिति कृष्णमाचारी सूचयति । वर्णेकरेण ( संस्कृतवाङ्मयकोशे प्रथमखण्डे, पृ, 453) विश्वनाथचक्रवर्तिनः कालः सप्तदशतकस्योत्तरार्ध इति ज्ञापितः । सोऽयं विश्वनाथकवि– वंङ्गदेशे जनिं प्राप्य वृन्दावने न्यवसत्, भागवतटीकां 1704 ई, वर्षे पूरयामास (तत्रैव ) प्रेमसम्पुटकाव्यस्य चरमे पद्ये –**षटशून्यऋत्ववनिभिर्गणिते तपस्ये श्री रूपवाङ्मधुरिमामृतपान पुष्टः** इति कवेर्वचनात् काव्यस्यास्य प्रणयनं 1606 वैक्रमाब्दे ( 1549 ई. वर्षे ) जातं, कविश्च रूपगोस्वामिनः शिष्य आसीदिति प्रमाणीक्रियते ।

***ख- मातृकायाम्-*** " षट्शून्यधात्ववनिभिर्गणिते – इति पाठः, तेन काव्यस्य रचना काले 1706 वैक्रमाब्दः इति गृहीते कवेः रूपगोस्वामिशिष्यत्वं न श्लिष्यति यतः रूपगोस्वामिनः कालः 1490 ई वर्षात् 1563 ई. वर्ष यावत् विद्यते । अतएव वर्णेकरमहोदयेन सूचितः कवेरस्य कालोऽपि अस्वीकरणीय एव ।

काव्ये ऽस्मिन्ननेकत्र सन्धिदोषाः व्याकरणविषयकस्खलनानि छन्दोभङ्गा वा सन्ति । तथापि भागवतभावभावितस्य कवेः राधाकृष्णप्रेमतदाकाराकारित्वमिहानु – भूयते । माधुर्यभावोऽत्र लसति । प्रेमस्वरूपमति विशदं कविना प्रत्यपादि । तथा चाह राधा –

एकात्मनीह रसपूर्णतमेत्यगाधे एकं सुसङ्ग्रथितमेव तदुद्वयं नौ ।
कस्मिंश्चिदेकसरसीव चकासदेकनालस्थमब्जयुगलं खलु नीलगौरम् ।।

तथा च –

प्रेमे यदेवमिदमेव न वेदमेतद्, यो वेद वेदविदसावपि नैव वेद ।।

कविविश्वनाथचक्रवर्तिविरचितम्

# प्रेमसम्पुटकाव्यम्

## संशोधनम्

अत्र मुद्रितपाठे 79– क्रमाङ्कितः श्लोक उज्झितः । स इत्थम् –

तन्मे मनोगतमिदं सहसैव साधु
सर्वं विवेद स विदग्धशिरोमणित्वात् ।
चातुर्यसम्पदतुलो रसिकाग्रगण्यः
किञ्चित् सपद्यथ हृदैव परामर्श ।।

साकल्येन काव्येऽस्मिन् 141– पद्यानि सन्ति । श्लोकममुं यथास्थानं संयोज्य 80– तमात् 141– तमं पद्यं यावत् क्रमाङ्काः शोधनीयाः ।

प्रातः कदाचिदुररीकृतचारुरामा –
वेषो हरिः प्रियतमाभवनप्रयाणे ।[1]
गत्वारुणांशुकतटेन पिधाय वक्त्रं
नीचीनलोचनयुगः सहसावतस्थौ[2] ।।1 ।।

आरादविलोक्य तमथो वृषभानुपुत्री
प्रोवाच – हन्त ललिते सखि पश्य केयम् ।
स्वस्यांशुभिर्हरिमणीमयतां[3] निनाय
मत्सदम पद्मवदनादभुतभूषणाढ्या[4] ।।2 ।।

श्रुत्वा सखीगिरमथो ललिताविशाखे
तं[5] प्रोचतुर्द्रुतमवाप्य तदाभिमुख्यम् ।
का त्वं कृशोदरि कुतः किमु वात्र कृत्यं
ब्रूहीत्यसौ प्रतिवचस्तु ददौ न कृष्णः[6] ।।3 ।।

श्रीराधिकाप्यथवितर्कपुरस्सरं तं
पप्रच्छ कौतुकवशादुपगम्य सम्यक् ।
का त्वं स्वरूपमहसैव मनोहरन्ती
देवाङ्गनासि किमहो सुषमैव मूर्ता ।।4 ।।

तूष्णीं स्थितं तदपि तं पुनराह भामि –
न्यात्मानमाशु कथयात्र यदि त्वमागाः ।
जानीहि नस्तव सखीः परमान्तरङ्गाः
किं शङ्कसे नतमुखि त्रपसेऽथ किं वा ।।5 ।।

---

* प्रथमश्लोकात् प्राक् 'ख' – मातृकायां ' श्रीश्रीराधाकृष्णाभ्यां नमः ' इति मङ्गलं दृश्यते।

1. प्रधान इति 'ख' मातृकायाम् ।
2. 'तथ्ये' इति ख – मातृकायाम् ।
3. 'स्वस्रांशुभि' रिति 'ख' – मातृकायाम् ।
4. स्तुतभूषणेति 'ख' मातृकायाम् ।
5. तां प्रोचतुरिति 'क' – मातृकायाम् ।
6. ' न किञ्चित् ' इति ख – मातृकायाम् ।

निःश्वस्य कञ्चन विषादमिवाभिनीय
वक्त्रं विवृत्य तमखण्डितमौनमुद्रा ।[1]
सा प्राह – हन्त रुजमावहसीति सत्यं
ज्ञातुं न तामृत इहेदृशता तव स्यात् ।।6 ।।

तां ब्रूहि कञ्जमुखि विश्वसिहि प्रकामं
मय्येव तत्प्रतिकृते च यथा यतेथाः ।
उदगीर्ण एव सृह्यदन्तिक एति शान्तिं
यन्मानसव्रणविपाकजतीव्रदाहः ।।7 ।।

कान्तेन किं त्वमसि सम्प्रति विप्रलब्धा
तस्यैव वा विगुणितोदयतः प्रतप्ता ।
किं त्वागसस्तदविषह्यतया बिभेषि[2]
तत् किं नु कल्पितमहो पिशुनैर्न सत्यम् ।।8 ।।

किं वा कृशोदरि[3] मनः सघृणे त्वदीयं[4]
प्रेम्णा रतं[5] क्वचन पुंसि वरे दुरापे ।
तत् त्वं कटूक्तिपटुना बत दिग्धचित्तं[6]
सन्तर्ज्यसे गुरुजनेन ततोऽसिदूना ।।9 ।।

कच्चिन्न तन्वि खरवाक्शरविद्धचित्ता[7]
सौभाग्यलेशमदिरान्धधियः सपत्नयः ।
सम्भाव्यते त्वयि न चैतदहो परा का
त्वत्तो वहत्यतुलसौभगचारुचर्चाम् ।।10 ।।

---

1. ' मौनमुद्रम् ' इति ख – मातृकायाम् ।
2. 'ख' मातृकायां पाठस्त्रुटितः ।
3. 'विवोच्चरि' इति ख – मात्कायाम् ।
4. तवाभूत इति 'ख' – मात्कायाम् ।
5. 'मन्देवतः ' इति 'ख' – मात्कायाम् ।
6. 'मादृशीव' इति 'ख' – मातृकायाम् ।
7. 'मर्मा' इति ख मातृकायाम् ।

त्वं मोहिनी किल चराचरमोहनार्थं
शम्भोरिवेन्दुमुखि, कस्य हठादुपैषि ।[1]
किञ्चेक्षते[2] यदि हरिस्त्वदपाङ्गविद्ध –
स्त्वां कौतुकं भवति तद्वति मोहनाख्ये[3] ।। 11 ।।

श्रुत्योत्तरीयपरियन्त्रितसर्वगात्रं
रोमाञ्चितं तमुपलभ्य जगाद राधा ।
हा किं सखि त्वममसि दैहिकदुःखदूना
वक्षोऽथ पृष्ठमथवा व्यथते शिरस्ते ।। 12 ।।

वात्सल्यतः[4] पितृपदैर्बहुमूल्यमेव
प्रस्थापितं यदखिलामयशातनाख्यम् ।
तैलं तदस्ति भवनान्तरतो विशाखे
शीघ्रं समानय तदामयहारकं[5] त्वम् ।। 13 ।।

तैलेन तेन किल मूर्तिमता मदीय –
स्नेहेन सुभ्रुवमिमां स्वयमेव साहम् ।
अभ्यञ्जयाम्यखिलगात्रमपास्ततोदं
नैपुण्यतः सखि शिरो मृदु[6] मर्दयामि ।। 14 ।।

नैरुज्यकारिवरसौरभवस्तुवृन्द –
प्रक्षेपचारुतरकोष्णपयोभिरेनाम् ।
संस्नापयामि विगतारुजमास्यपद्म –
मुल्लासयाम्यथ गिरापि विराजयामि ।। 15 ।।

---

1. ' दुदेषि ' इति 'ख' मातृकायाम् ।
2. ' चच्छते ' इति ख – मातृकायाम् ।
3. ' मोहनाख्यम् ' इति ख – मातृकायाम् ।
4. वात्सल्यवत् इति क– मातृकायाम् ।
5. ' यदि खिलामायशातनाख्यम् ' इति ख – मातृकायाम् ।
6. ' हृदि इति 'ख' मातृकायाम् ।
7. विगतारूष इति 'ख' – मातृकायाम् ।

वाचा मया मृदुलयाऽतिहितप्रवृत्या
स्नेहेन चानुपधिना परमादृतापि ।
तो वक्ति किञ्चिदधुनैव कटूकृता स्यात् [1]
तिष्ठेदियं कपटिनी यदि हन्त सख्यः ।। 16 ।।

(युग्मकम् ) [2]
अस्या रुजस्तदपरां करवै चिकित्सां
यां प्राप्य तन्वसुमनो निखिलेन्द्रियाणाम् ।
व्याधिः प्रशाम्यति भवेदतिपुष्टिरेषां
धन्वन्तरिप्रहितदिव्यरसैरिवाद्धा ।। 17 ।।

कुञ्जाधिराजकरकञ्जतलाभिमर्श –
मस्या उरस्यतितरां यदि कारयामि ।
सेयं वदिष्यति हसिष्यति सीत्करिष्य–
त्यस्मांश्च हासयितुमेष्यति कांश्चिदाशु [3] ।। 18 ।।

श्रुत्वां गिरं स विहितस्मितमास्यपद्म –
मुन्नीयरम्यतरसव्यकराङ्गुलीभिः ।
उत्सार्य किञ्चिदल कानवगुण्ठनं च
न्यञ्चत्तरां कियदुदञ्चयतिस्म मूर्ध्नः [4] ।। 19 ।।

किञ्चिज्जगाद रमणी रमणीयकण्ठ –
सौस्वर्यमेव रचयद् वचनं यदेषः ।
सा तच्चकोरललनेव पपौ चिराय
काञ्चिच्चममत्कृतिमवाप च सालिपालिः ।। 20 ।।

---

[1] ' कटुं गता स्या ' इति ख – मातृकायाम् ।
2. इदं ख – मातृकायां योजितम् ।
3. ' हासयितुमेकाञ्चिदाभाम् ' इति ख– मातृकायाम् ।
4. ' मूर्ध्नाम् ' इति 'ख' – मातृकायाम् ।

देव्यस्मि नाकवसतिः शृणु यस्य हेतो–
स्त्वामागमं सुवदने विधुरीकृतात्मा ।
कुत्रापि मे विविदिषास्ति[1] विवक्षितेऽर्थे
सम्पादयिष्यति परा त्वदृते कुतस्ताम् ।। 21 ।।

मा तथ्यमप्यभिदधास्त्वमुदेषि देवी –[2]
त्यस्माभिरित्थमधुनैव हि पर्यचेष्टाः ।
यन्मानुषीसु कतमास्ति भवत्सदृक्षा –
कान्त्यानयानुपमया त्वमिवेक्ष्यसे त्वम् ।। 22 ।।

यत् त्वय्यहं सरलधीर्वितथं वितर्क –
वैविध्यमप्यकरवं शरदम्बुजास्ये ।
यत्पर्यहासिषमितोऽस्तु न मे ऽपराध –
स्त्वं स्निह्यसीहमपि यद्यभवंत्वदाप्या[3] ।। 23 ।।

किं सङ्कुचस्ययि सखीत्वमभू [4] स्त्वदीयो
देवीजनोऽप्यहममूवमिति प्रतीहि ।[5]
त्वत्प्रेमरूपगुणसिन्धुकणानुभूते
दासीभवाम्यहमपीति सदाभिमन्ये ।। 24 ।।

यदवच्म्यहं तदवधेहि यतोविषादो
दुर्वार एव तमपाकुरू संशयं मे ।
नैवाधुनापि विरराम दरोऽपि तेहा –
तापस्त्वदीयलपनामृतसेकतोऽपि ।। 25 ।।

---

1. विवदिषास्ति इति क – मातृकायाम् ।
2. ' नैवाभ्यधास्त्वमनृतं यदुदेषि देवी ' इति ख – मातृकायाम् ।
3. ' स्निह्यसीह यद्यभवंत्वदीया ' इति ख – मातृकायाम् ।
4. ' मभूत् ' इति क – मातृकायाम् ।
5. ' प्रतीपम् ' इति क – मातृकायाम् ।

वृन्दावने ध्वनति यः सखि कृष्णवेणु –
स्तदविक्रमः सुरपुरे प्रबलत्वमेति ।
साध्वीततेरपि मनः सघृणं यतोऽभूत्
कण्ठोपकण्ठमिलनेस्मरणेऽपि पत्युः ।। 26 ।।

श्लिष्टवैव मुञ्चति सुरः सवितर्कमात्म –
कान्तादभुतं ज्वलदलातनिभाङ्गयष्टिम् ।
हालाहलं मुरलिका निनदामृतं यत्
पीत्वैव सा तनुमहाज्वरमूर्च्छिताभूत् ।। 27 ।।

अस्मत्पुरेऽस्ति नहि कापि जरत्यतः कां –
स्तर्जन्तु का नु निखिला अपि तुल्यधर्माः ।
का वा हसेयुरपरा यदिमाः सतीत्वं
विप्लावयन् मुरलिकानिनदो व्यजेष्ट ।। 28 ।।

एवं यदि प्रववृते प्रतिवासरं [1] स
वेणुध्वनिः प्रभवितुं विबुधाङ्गनासु ।
तर्ह्येकदा ह्रदि मयैव विचारितं [2] हा
को ऽ यं कुतश्चरति वादयितास्य को वा ।। 29 ।।

इत्थं दिवा समवतीर्य भुवीह [3] साधु
वंशीवटें ऽ हमवसं [4] कतिचिद् दिनानि ।
दृष्टो हरेरनुपमो विविधो विलासः
कान्तागणप्रिय सुखान्यपि पर्यचायि ।। 30 ।।

---

1. प्रतिवासरे इति 'क' – मातृकायाम् ।
2. विचारते इति 'क' – मातृकायाम् ।
3. पुरीह इति 'ख' मातृकायाम् ।
4. वंशीवटे वसमहम इति 'ख' मातृकायाम् ।

राधा सनर्म मधुराक्षरमाह धन्ये
त्वं गण्यसे सुरपुरे वरचातुरीभाक् ।
अन्या पुनर्बलवदुत्कलिकाकृपाणी –[1]
कृत्तैन्द्रियैव[2] सुमनस्त्वमपादपार्थम् ।।31 ।।

मन्दभ्रमद्द्रुमधुरस्मितकान्तिधार –[3]
धौते विधाय रदनच्छदने स चाह ।
राधे ऽ परा स्वसदृशी नहि वीक्षि किं भोः
शक्यावलोकयितुमप्यपरेण[4] पुंसा ।।32 ।।

किं वः परेण पुरुषेण हरेर्विलास –
मेवान्वभूः रहसि साधु यदर्थमागाः ।
तद् ब्रूहि किं तव विवक्षितमत्र मध्ये
नर्मातनोमि यदि मामकरोः सखीं स्वाम् ।।33।।

( राधिकावाक्यम् )
नर्मातनुष्व सखि नर्मणि का जयेत् त्वां
प्राणास्त्वमभूस्त्वमपि मे कतरत् स्वसख्यम् ।
त्वं मानुषी भवसि किं त्वममराङ्गनास्ता
मूर्ध्नैव ते गुण कथाः पुनतीर्नमन्ति ।।34 ।।

नेयं स्तुतिस्तव न चापि तटस्थता मे
नापि ह्रियं व्रज वदाम्यनृतं न किञ्चित् ।
सिन्धोः सुतापि गिरिजापि न ते तुलायां
सौन्दर्यसौभगगुणैरधिरोढुमीष्टे[6] ।।35।।

---

1. ' कृपाली ' – इति ख – मातृकायाम् ।
2. ' श्रुत्वेन्द्रियैव ' इति ख – मातृकायाम् ।
3. ' भ्रमधुमन्मतुतभाजिधारा ' इति 'क' – मातृकायाम् ।
4. ' मपीह परेण पुंसाम् ' इति ख – मातृकायाम् ।
5. ' तटस्तुता ' इति ख – मातृकायाम् ।
6. ' मीस्ते ' इति 'ख' मातृकायाम् ।

प्रेम्णा पुनस्त्रिजगदूर्ध्वपदे ऽपि काचित्
त्वत्साम्यसाहसधुरां मनसापि वोढुम् ।
शक्नोति नेत्यखिलमेव मया श्रुतं तत्
कैलासशृङ्गमनु [1] हैमवतीसभायाम् ।। 36 ।।

श्रुत्वा महानजनि मे मनसोऽभिलाष –
स्त्वददर्शनाय [2] समपूरि स चापि किञ्च ।
तापस्तदन्तरिह यो रभसाददीपि
तेनास्फुटन्न कठिनो हि [3] ममान्तरात्मा ।। 37 ।।

काऽसौ तमाशु कथयेति मुहुस्तयोक्तो
वक्तुं शशाक न स वाष्पनिरुद्धकण्ठः ।
अश्रुस्रुतेक्षण [4] मथास्य मुखं स्वयं सा
स्वेनाञ्चलेन मृदुलेन ममार्ज राधा ।। 38 ।।

स्थित्वा क्षणं धृतिमधादथ तामुवाच
स्नेहस्त [5] वायमतुलो ऽनुपधिर्वलीयान् ।
कृष्णे ऽतिकामिनि बभूव कथं दुनोति
स्वं स्वांश्च विश्वसिति योऽन्यपदेऽप्यभिज्ञ ।। 39 ।।

सौन्दर्यशौर्यवरसौभगकीर्तिलक्ष्मी –
पूर्णो ऽपि सर्वगुणरत्नविभूषितो ऽपि।
प्रेमाविवेचकतमत्वमसौ बिभर्ति
कामित्वहेतुकमतः श्रयितुं न योग्यः ।। 40 ।।

---

1. ' मननु ' इति 'ख' मातृकायाम् ।
2. ' तद् – दर्शनाय ' इति 'ख' मातृकायाम्
3. ' हि ' इति 'ख' – मातृकायां नास्ति। अत्र छन्दोभङ्गः ।
4. ' प्लेक्षण ' इति 'ख' – मातृकायाम् ।
5. ' प्रेमा ' इति 'ख' – मातृकायाम् ।

तस्मिन् दिने बहु विलस्य मुहुः प्रकाश्य
प्रेम त्वया सरभसं रजनौ तु कुञ्जे ।
सङ्केतगामृजुधियं भवतीं विधाय
काञ्चित् परां स रमयन् कपटी जहौ त्वाम् ।।41 ।।

यत् त्वं तदा व्यलप एव सखीस्तुदन्ती
वल्ली – पतत्रि – विततीरपि रोदयन्ती ।
सर्वं तदालिमयका निभृतं न्यभालि
वंशीवटास्थिततया वलिता रुषैव ।।42 ।।

रासे तथैव विहरन्नपरा विहाय
प्रेम त्वयैव [1] सहसा प्रकटीचकार ।
स्थित्वा क्षणं स भवतीममुचद् वनान्त
एकाकिनीं रतिभरश्रमखिन्नगात्रीम् ।।43।।

तर्हि स्नुतं [2] विलपितं गहना च मूर्च्छा
चेष्टाप्यति भ्रममयी तव यद्यदासीत् ।
व्याप्यैव हा बहु जनूंषि ह्रदि स्थितं में
तत्कष्टमष्टविधयैव तनोः प्रकृत्या ।।44।।

देवी जनोऽस्मि ह्रदि मे क्व नु कष्टमासीद्
दैवाद् यशस्विनि बभूव भवद्दिदृक्षा ।
यामागमय्य [3] बत सा ऽकृतकीलबद्धां [4]
यस्यास्ति नैव सखि निर्गमनेन मुक्तिः [5] ।।45।।

---

1. त्वय्यैव इति ख – मातृकायाम् ।
2. ' प्लुतम् ' इति ख – मातृकायाम् ।
3. ' मा मा गमय्य ' इति ख – मातृकायाम्।
4. ' ह्रतकीलविद्धाम ' इति ख – मातृकायाम्।
5. निर्गमनेऽप्युपाय इति ख – मातृकायाम् ।

सन्दानितं त्वयि मनो न दिवं प्रयातुं
स्थातुं च नात्र तिलमात्रमपीहते मे ।[1]
उद्घूर्णते प्रतिपदं न पदं लभे ते
ह्यद्याभवं त्वयि चिरात् प्रकटस्वभावः[2] ।। 46 ।।

कृष्णात् पुनबहु र्बिभेमि न धर्मलोक –
लज्जादयाध्वनि कदापि न पान्थताऽस्य ।।
बाल्ये स्त्रियास्तरुणिमन्यचिराद् वृषस्य
वत्सस्य मध्यमनु येन वधो व्यधायि [3] ।। 47 ।।

गान्धर्विकाहसुभगे त्वयि कापि शक्ति –
राकर्षिणी खलु हराविव सन्ततास्ति ।
यन्निन्दसि प्रियतमं तदपि प्रकामं
मच्चित्तमात्मनि करोष्यनुरक्तमेव ।। 48 ।।

त्वं मे सखी भवसि चेन्न दिवं प्रयासि
नित्यं[4] स्थितिं व्रजभुवीह मया करोषि ।
तत् प्रेमरत्नवरसम्पुटमुद्घटय्य
त्वां दर्शयामि तदृते न समादधामि ।। 49 ।।

हन्ताधुनापि नहि विश्वसिषि प्रसीद
दासीभवामि किमु मां न सखीकरोषि ।
त्वं शाधि साध्वि धिनु वा न परागतिर्मे
राधे त्वमेव शपथं करवाणि विष्णो ।। 50 ।।

---

1. मपीत्थमिष्टम् इति ख – मातृकायाम् ।
2. प्रकटीकृतात्मा इति ख – मातृकायाम् ।
3. वत्सस्य मध्यमनु यो व्यधितैव हिंसाम् इति ख – मातृकायाम्
4. विषमे इति ख – मातृकायाम् ।

वक्तुं तदा प्रववृते वृषभानुनन्दि
न्याकर्ण्यतां विविदिषामिह चेद् दधासि ।
प्रेमेयदेव[1]मिदमेव न वेदमेतद्
यो वेद वेदविदसावपि नैव वेद ।।51।।

यो वेद यद् विविदिषुं सखि वेदनं यद्
या वेदना तदखिलं खलु वेदनैव ।
प्रेमा हि को ऽपि पर एव विवेचने ऽपि
सत्यं व्यधात् परमसाविवेचने ऽपि ।।52।।

द्वाभ्यां यदा रहितमेव मनः स्वभाव –
सिंहासनोपरि विराजति राग[2] शुद्धम ।
तच्चेष्टितैः[3] प्रियसुखे सति यत् सुखं स्यात्
तच्च स्वभावमधिरूढमवेक्षयेत् तम् ।।53।।

लोकद्वयात् स्वजनतः परतः स्वतो वा
प्राणप्रियादपि सुमेरुसमा यदि स्युः ।
क्लेशांस्तदप्यतिबली सहसा विजित्य
प्रेमैव तान् हरिरिभानिव पुष्टिमेति ।।54।।

स्निग्धाङ्गकान्तिरथगर्वधरो ऽत्यभीतो
विस्रम्भवान् स्वपिति किं गणयेदसौ तान् ।
कण्ठीरवः शुन इवाथ भवन्[4] सराग–
स्तेष्वेव राजतितमां[5] तमसीव दीपः ।।55।।

---

1. ' प्रेमे ' इत्यत्र च्युतसंस्कृतिः ।
2. ' रागिशुद्धम् ' इति ख – मातृकायाम् ।
3. ' तच्चेत् स्थिते ' – रिति ख – मातृकायाम् ।
4. भवान् ' इति ' ख मातृकायाम् ।
5. ' तराम् ' इति ख – मातृकायाम्

लाम्पट्यतो नवनवं विषयं प्रकुर्व –
न्नास्वादयन्नतिमदोद्धुरतां दधानः ।
आह्लानादयन्नमृतरश्मिरिव त्रिलोकीं
सन्तापयन् प्रलयसूर्य इवावभाति ।।56 ।।

एतं बिभर्ति सखि कः क्व नु गोपराज –
सूनुं विना त्रिभुनुवने तदुपर्यधो ऽपि ।
प्रेमाणमेनमलमेणदृशो ऽनुविन्द –
न्त्यत्रैव गोष्ठभुवि काश्चन तारतम्यात् ।।57।।

प्रेमापि काम इव भाति बहिः कदाचित्
तेनामितं प्रियतमः सुखमेव विन्देत् ।
प्रेमैव कुत्रचिदवेक्ष्यत एव कामः
कृष्णस्तु तं परिचिनोति बलात् कलावान् ।।58।।

कृष्णान्तिकं सखि नयाशु निकामतप्तां
मामित्युदाहरति किन्तु तदात्मजेन्न ।
कामेन तत्सुखपरं दधती स्वभावा –
देव स्वचित्तमियमत्र न कामिनी स्यात् ।।59।।

प्रेमाम्बुधिर्गुणमणीखनिरस्यशाठ्य –
चापल्यजैह्म्यमखिलं [2] रसनीयमेव [3] ।
प्रेमाणमेव किल काममिवाङ्गनासु
सन्दर्शयन् स्वमुदकर्षयदेव यस्ताः ।।60।।

---

1. ' इवातिभाति ' इति 'क' मातृकायाम् ।
2. ' मलिनम् ' इति ख – मातृकायाम् ।
3. ' रमणीयमेव ' इति ख – मातृकायाम् ।

का वाऽङ्गनाः शतसहस्रममुष्य काम –
पर्याप्तये मदकलाः प्रभवन्तु यत्ताः ।
प्रेमा तदत्र रमणीष्वनुपाधिरेव
प्रेमैकवश्यतमता च मयान्वभावि ।।61।।

तत्रापि मय्यतितरामनुरज्यतीति
लोकप्रतीतिरपि नह्ययनृता कदाचित् ।
यत्प्रेम मेरुमिव मे मनुतेऽपरासां
नो सर्षपैस्त्रिचतुरैरपि तुल्यमेषः [1] ।।62।।

प्रेमानुरूपमपि रज्यति यत् परासु
रागानुरूपमिह दीव्यति नापराध्येत् ।
दैवाद् व्यतिक्रममुपैति कदाचिदस्मा –
न्नासौ सुखीभवति तेन न (च) मां दुनोति ।।63।।

सङ्केतगामपि विधाय मदेकतानो [2]
मां नाजगाम यदिहाभवदन्तरायः [3] ।
रुद्धः कयाचिदनुरोधवशात् [4] स रेमे
मद्दुःखचिन्तनदवाकुल एव रात्रिम् ।।64।।

तेनैव मे ह्रदि महादवथुर्बभूव
मद्वेषभूषणविलासपरिच्छदादि ।
तन्मोदकृद [6] विफलतामगमत् किमद्ये –
त्याकन्दितं यदपि तर्हि तदन्यभूस्त्वम् ।।65।।

---

1. तुल्यमेतदि ति शुद्धः पाठः स्यात् ।
2. ' ताने ' इति ख – मातृकायाम् ।
3. ' यदिहावेदन्तरागः ' इति ख – मातृकायाम् ।
4. दनुरागवशादिति 'ख' – मातृकायाम् ।
5. ' मोदहृत् ' इति ख – मातृकायाम् ।

प्रातस्तमत्यनुनयन्तमतर्जयन् भो –,
स्तत्रैव गच्छ सुखमाप्नुहि तत्पुनश्च ।
रोषः स तत्सुखकरः प्रियतोत्थ एवे –
त्यालोच्चयं व्रजभुवो ऽप्यनुरागचर्याम् ।।66।।

अद्योतयं मुहुरहं निजकाममेव
किं मां विहाय रमयस्यपरां शठेति ।
वाचा स चापि रतिचिह्नजुषा स्वभूर्त्या [1]
व्यज्यैव काममथ मन्तुमुरीचकार ।।67।।

प्रेमा द्वयो रसिकयोः स्थिरदीप[2] एव
हृदवेश्म भासयति निश्चलमेव भाति।
द्वारादयं वदनतस्तु बहिष्कृतश्चे –
न्निर्याति[3] शीघ्रमथवा लघुतामुपैति ।।68।।

अन्तःस्थितस्य खलु तस्य रुचिच्छटाक्षि –
वातायनादधरगण्डललाटवक्षः ।
चारु प्रदीप्य तदभिज्ञजनं स्वभासो
विज्ञापयेदपि विलक्षणतामुपेतः[4] ।।69।।

कान्तेन किन्तु [5] बहुवल्लभताजुषा स्या –
न्निष्कामिनो ऽ पि स मुहुर्नहि यातिशान्तिम् ।
मिथ्यैकभाषणपटुत्वमयी प्रथास्य
कामं दिशेद् यवनिकेव पिधाय तन्द्राम् ।।70।।

---

1. मूर्ध्ना 'इति' ख – मातृकायाम् ।
2. 'रसिकयोरपि दीप एव' इति 'क' – मातृकायाम् ।
3. 'निर्वाति' इति ख – मातृकायाम् ।
4. 'मुपेताः' इति ख – मातृकायाम् ।
5. 'तेन' इति ख – मातृकायाम् ।

त्वय्येव मे प्रियतमेऽनुपमोऽनुरागः
स्वप्नेऽपि वस्तुमपरां हृदि किं ददामि ।
इत्थं हरिर्वदति मानवती सदान्याः
मां खण्डितां तु रतिचिह्नभृदेव वक्ति ।।71।।

मद्वक्त्रनेत्रसुषमासममाधुरीक –
सौन्दर्यवर्णनविलासजिगीषुरेव ।
प्राणास्त्वमेव हि ममेति वदन् व्यनक्ति
नं प्रेम तत् , तदपि किन्त्विह काममेव ।।72।।

सन्तप्यते यदि पुनर्विरहाग्निपुञ्जै –
रुत्कण्ठया चुलुकितस्वगभीरमाध्वी ।
प्रेम व्यनक्ति दयितापि गिरा यथैव
यत् ते सुजातचरणाम्बुरुहेति पदमम् ।।73।।

तस्मिन् महाविरसतातितमस्यपारे
न प्राणवायुरपि सञ्चरितुं शशाक ।
प्रेमप्रदीप वर एत्यति दीप्तिमेव
स्नेहो ऽपितां [2] प्रचुरतां चिरमाचकाङ्क्ष [3]।।74।।

रासे मयैव विजहार विहाय सर्वा –
स्तत्रापि मां यदमुचत् शृणु तस्य तत्त्वम् ।
प्रेमाम्बुधेर्ब्रजपुरन्दरनन्दनस्य
मामेव मन्तुरधिकां न कदापि (चान्याम्) ।।75।।

---

1. ' दीप्तिरेव ' इति ख – मातृकायाम् ।
2. ' स्नेहो न यत् ' इति ख – मातृकायाम् ।
3. ' माचिकाय ' इति ख – मातृकायाम् ।

अध्यास्य मामतुलसौभगदिव्यरत्न –
सिंहासनं बहुविलासभरैर्विभूष्य ।
गच्छन् वनाद् वनमरीरमदेव कान्ता –
मन्यां पुनः स्मृतिपथेऽपि निनाय नायम् ।।76 ।।

किञ्चिन्मयैव मनसैव विचारितं त –
ह्यैतन्महोत्सवसुधाम्बुधिमत्यपारम् ।
नैवान्वभून्मम सखीततिरावयोः सा
विश्लेषसञ्ज्वरयुता [1] क्व नु किं करोतु ?[2] ।।77 ।।

अत्रास्व हे यदि पुनः कतिचित् क्षणांस्ता
आल्यो मिलन्ति रमसादभितो भ्रमन्त्यः ।
इत्यभ्यधां प्रियतमाथ न पारये ऽहं
गन्तुं मुहूर्तमपि [3] विश्रमणं भजस्व [4] ।।78 ।।

एतां नयन्नुपवने यदि बम्भ्रमीमि
सम्भावितात्यतिरुजा पुरु विद्धचित्ताम् ।
किं स्यात् सुखं यदि दधे स्थितिमत्र गोप्यः
सर्वा मिलेयुरपि ताः कुटिलभ्रुवो माम् ।।79 ।।

एनां पुनश्चिरमनेकमुपालभेरन्
भङ्गोऽस्य साम्प्रतिककेलिरसस्य भावी ।
सम्पत्स्यते ऽद्य नहि रासविनोदनृत्यं
तासु क्रुधा निजनिजं सदनं गतासु ।।80 ।।

---

1. ' धुता ' इति ख – मातृकायाम् ।
2. ' करोति ' इति ख – मातृकायाम् ।
3. ' मिह ' इति ख – मातृकायाम् ।
4. ' भजेव ' इति ख – मातृकायाम् ।
5. ' चिन्तःव् ' इति क – मातृकायाम् ।

यत् प्रार्थितं स्वकुतुकेन पुरा मयैव
शक्नोषि किं न कुलजार्बुदलक्षकोटीः ।
आलिङ्गितुं प्रियतम क्षणमेकमन्वि –
त्यास्ते दिदृक्षितमिदं मम पूरयेति ।। 81 ।।

तस्मादिमामपि जहत् पलमात्रमेव
निर्दूषणां विनयिनीं प्रथमं विधाय ।
मन्तुं स्वमूर्घ्न्यखिलमेव दधां पृणीयां –
स्ताः स्नेहयानि निखिला अपि [1] सर्वथाऽस्याम् [2] ।। 82 ।।

वैश्लेषिकज्वरमपारमतुल्यमस्याः
सन्दर्श्य विस्मय–महाब्धिषु मज्जितानाम् ।
सप्रेमगर्वमयि निर्धुतवानथैनां
ता वै महाधिकतमामनुभावयानि [3] ।। 83 ।।

सम्भोग एष सकलाधिक एव विप्र–
लम्भोऽपि सर्वशतकोटिगुणोऽधिकोऽस्तु [4] ।
द्वाभ्यां शुचिः परमपुष्टिमुपैतु वास्या –
स्ता हेपयत्वलमिमां तु गुरूकरोतु ।। 84 ।।

कामी हरिर्भवति नो यदसौ विहाय
प्रेमाधिका अपि रहो रमते तु तस्याम् ।
इत्थं वदन्त्यहह सम्प्रति या [5] रुषाऽस्या
आलीस्तुदन्ति बहुधा च विदूषयन्ति [6] ।। 85 ।।

---

1. ' द्यपि ' इति 'ख' – मातृकायाम् ।
2. ' स्या' इति 'ख' – मातृकायाम् ।
3. अस्पष्टः पाठः ।
4. ' ऽस्ति ' – इति ख – मातृकायाम् ।
5. ' वा ' इति ख – मातृकायाम् ।
6. ' बहुनावपि दूषयन्ति , इति ख – मातृकायाम् ।

ता एव कोटिगुणिता विरहे त्वमुष्याः
प्रेमाग्निदावविशिखाः [1] परिचाययानि ।
याभिर्बलादुपगतादरलिह्यमानाः [2]
स्वप्रेमदीपदहनायितमेव [3] विद्युः ।। 86 ।।

एवं च सेत्स्यति मदीशितमेकमासां
रासाख्यनाट्यमनुमण्डलतां गतानाम् ।
मध्ये मया सह रुचा तु विराजमाना –
मेनां विलोक्य न भवेदपि काचिदीर्ष्या ।। 87 ।।

कष्टं कदापि सुखसम्पदुदर्कमेव
मित्राय मित्रमपि यच्छति तद्धितैषि ।
तीव्राञ्जनैर्यदपि मूर्च्छयति स्वदृष्टि –
मायात्यति द्युतिमतीं कुरुते जनस्ताम् ।। 88 ।।

इत्यन्तयुक्ति [4] रुरसा सरसं वहन् मां
गत्वा पदानि कतिचिन्मृदुलप्रदेशे ।
अत्रास्यतां क्षणमयीति [5] निधाय तत्रै –
वास्ते स्म मे नयनगोचरतां जहत् सः ।। 89 ।।

दृष्टवा ममाति विकलत्वमपास्तधैर्यो
दातुं स्वदर्शनमियेष यदा तदैव ।
गोप्यः सखीविततयश्च समेत्य ता मत् –
सन्धु क्षणे समयतन्त नितान्ततप्ताः ।। 90 ।।

---

1. ' वाडवशिखाः ' इति ख – मातृकायाम् ।
2. ' माला ' इति क – मातृकायाम् ।
3. दहनार्चिशिखेव इति क – मातृकायाम् ।
4. ' इत्यतियुक्ति ' – इति ख – मातृकायाम् ।
5. ' मपीति ' इति ख – मातृकायाम् ।

यच्चावधीत् पुनररिष्टवकाद्यवत्सान्
विश्वद्रुहः कपटिनीमपि पूतनां ताम् ।
दोषो न चायमपि तूच्चतरैव विष्णोः
शक्तिर्हरावजनि साधुजना [1] वनीयम् ।।91 ।।

नारायणेन सदृशस्तनयस्तवाय –
मित्याह यद् व्रजपुरन्दरमेव गर्गः ।
तत्साक्षिभूतमिह दैत्यवधादिकर्म
लोकोत्तरं समुदगाद् गिरिधारणादि ।।92 ।।

किञ्च स्फुरत्यपि [2] यथा मम चेतसीदं
तेनापि नापि कथितं मुनिपुङ्गवेन ।
नारायणोऽप्यघभिदो नहि साम्यमस्य
रूपैर्गुणैर्मधुरिमादिभिरेतुमीष्टे ।।93 ।।

आकर्ण्य कर्णकमनीयतमाः [3] प्रियाया
वाचो हरिः सरभसं पुरभ्यधत्त ।
प्रेमोक्त एव खलु लक्षित लक्षणो यः
सोऽयं त्वदाश्रयक एव मयाप्यबोधि [4] ।।94 ।।

दोषा अपि प्रियतमस्य गुणा यतः स्यु –
स्तददत्तकष्टशतयप्यमृतायते यत् ।
तददुःखलेशकणिकापि [5] यतो न सहया
त्यक्त्वात्मदेहमपि यं न [6] विहातुमीष्टे ।।95 ।।

---

1. घना. – इति 'ख' – मातृकायाम् ।
2. ' त्ययि ' इति 'ख' – मातृकायाम् ।
3. ' रमणीयतमा ' इति ख – मातृकायाम् ।
4. मयाद्य. – इति ख – मातृकायाम् ।
5. ' कलिकापि' इति ख – मातृकायाम् ।
6. 'स' इति 'क' – मातृकायाम् ।

योऽसन्तमप्यनुपमं महिमानमुच्चैः
प्रत्यायत्यनुपदं सहसा प्रियस्य ।
प्रेमा स एव तमिमं दधती त्वमेव
राधे श्रुता खलु यथैव तथासि [1] दृष्टा ।। 96 ।।

प्रेमी हरिस्तु न भवेदिति सत्यमेव
तच्चेष्टितैरनुमितं [2] यदिमेविदन्ति ।
प्राणा मम त्वदनुतापदवाग्निदूनाः
सख्यस्तवात्र निखिला अपि यत् प्रमाणम् ।। 97 ।।

यच्च त्वयोक्तमिदमेव मनोगतं मत् –
प्रेष्ठस्य तत् तु कथमत्र वयं प्रतीमः ।
नो तन्मुखात्त्वमशृणोर्न च तस्य सख्यु –
स्तौ वा जनुष्यवभवतां क्व न सत्यवाचौ ? ।। 98 ।।

यर्हयेव यद् यदपि मत्प्रियचेतसि स्यात्
तर्हयेव तत् तदखिलं सहसैव [3] वेद्मि ।
राधे विदुष्यसि किमच्युतयोगशास्त्रं
शक्नोषि येन परकायमनःप्रवेष्टुम् ।। 99 ।।

देवी जनोस्म्यविरताच्युतयोगसिद्धि –
र्व्यग्रस्तथा कथमहो बत मानुषी स्याम् ।
यत् पृच्छसीदमपि [4] वक्तुमशेषमीशे
चेद् विश्वसिष्यपरथा तु कथा वृथैव ।। 100 ।।

---

1. ' मयैव तथैव ' – इति ख – मातृकायाम् ।
2. तं चेष्टितै रिति इति 'क'– मातृकायाम् ।
3. ' महसैव ' इति ख – मातृकायाम् ।
4. ' मयि ' इति ख – मातृकायाम् ।

प्रत्यायनेऽस्ति यदि युक्तिरतिप्रभावः
किं वा ऽ लि ते कथमिदं न वयं प्रतीमः ।
नो चेत् प्रियस्तव गुणार्णव एव किन्तु
प्रेमी भवेदयमिदं तु मतं तवैव ।। 101 ।।

प्रेष्ठः परो भवति तस्य मनो न बुध्ये –
दित्येव भात्यनुभवाध्वनि हन्त यस्याः ।
सैवोच्यतां नु परकायमनःप्रवेश –
विद्यावतीनि परिहासविदा त्वयाद्य ।। 102 ।।

राधे तदा विलपितं किमिति त्वयोच्चै [1] –
र्ज्ञात्वा हृदस्य सुखिनी कथमेव नाभूः ।
सत्यं ब्रवीष्यपितु देव्यधेहि कापि
शक्तिर्विवेकभिदभूत् तददर्शनेऽस्य ।। 103 ।।

त्वं वेत्सि तन्मन इहास्तु न मे विवादो
गान्धर्विके तव मनः स हि वेद नो वा ।
वेदेति किं भणसि भोः शृणु यद् रहस्यं
तत्त्वं त्वया यदभवं तरलीकृतेव ।। 104 ।।

राधे जनो ऽयमपि यत् तरलीकृतो [2] ऽभूत्
प्रेम्णा त्वयैव तदपृच्छदिदं सधार्ष्ट्यम् ।
शुश्रूषते श्रवणमस्य यथारहस्यं
वक्तुं तथार्हसि न गोपय किञ्चनापि ।। 105 ।।

---

1. ' तयोच्चै ' इति ख – मातृकायाम् ।
2. ' तरणीकृत ' इति ख – मातृकायाम् ।

अन्योन्यचित्तविदुषौ न परस्परात्म –
नित्यस्थितेरिति नृषु प्रथितौ यदावाम् ।
तच्चौपचारिकमहो द्वितयत्वमेव
नैकस्य सम्भवति कर्हिचिदात्मना नौ ।। 106 ।।

एकात्मनीह रसपूर्णतमेत्यगाधे
एका सुसङ्ग्रथितमेव तनुद्वयं नौ ।
कश्मिंश्चिदेक सरसीव चकासदेक [1] –
नालस्थ [2] मब्जयुगलं खलु नीलगौरम् [3] ।। 107 ।।

यत् स्नेहपूरभृतभाजनराजितैक –
वर्त्यग्रवर्त्यमलदीपयुगं चकास्ति ।
तच्चेतरेतरतमो ऽपनुदत् परोक्ष –
मानन्दयेदखिलपार्श्वगताः सदालीः ।। 108 ।।

यद् यापयेद् विरहमारुत एतदात्त –
कम्पं भवेद् युगपदेव भजेच्च मूर्च्छाम् ।
व्यग्रा सदाल्यथ तदावरणे यतेत
तत् सुस्थयेच्च सुखसद्मगतं विधाय ।। 109 ।।

सन्दर्शितं तदिदमद्य रहस्यरत्नं
स्व – स्वान्त – सम्पुटवरं स्फुटमुद्घटय्य ।
सन्देहसन्तमसहारितवास्तुभव्ये
हृद्येव धार्यमनिशं न बहिः प्रकाश्यम् ।। 110 ।।

---

1. ' सरसि व्यचकासदेक ' – इति 'ख'– मातृकायाम् ।
2. ' नालोत्थ' – इति ख – मातृकायाम् ।
3. ' पीतम् ' इति ख – मातृकायाम् ।

कृष्णो जगाद – सखि यद् यदिदं त्वयोक्तं
तत् तत् सयुक्तिकमधारय एव[1] सर्वम् ।
चेतस्तु मे शठमहो हठवर्त्यवश्यं
तत् ते परीक्षितुमिहेच्छति किं करोमि ।। 111 ।।

त्वं वर्तसे ऽत्र स तु साम्प्रतमात्मतात –
गेहे कदाचिदवनाय गवां वने वा ।
आत्मैक्यमालि युवयोर्यदिह प्रतीम –
स्तत् किं परीक्षणमृते समुपैति सिद्धिम् ।। 112 ।।

यैव स्मृतिः सुमुखि तस्य[2] यथा यदा ते
सैवास्य चेद् भवति चेदथवा तदैव
प्रत्यक्षमेव यदि तां कलयामि सम्प्र–
त्यत्रैव वां सखि तथैव दधे[4] प्रतीतिम् ।। 113 ।।

दूरेऽथवा निकट एव स ते प्रियः स्या –
देहीह सत्त्वरमिति स्मृतमात्र एव[5] ।
आयाति चेत् तव समक्षमयं तदा वा –
मात्मैक्यमित्यवगमो धिनुयात् सदा माम् ।। 114 ।।

विघ्नः क्वचित् तु गुरुनिघ्नतयापि दैवाद
दैत्यागमादपि कुतश्चन वापि हेतोः ।
अन्योन्यमप्युत युवां स्मरतोर्यदि स्या–
न्नो सङ्गम[6] स्तदिह नास्तितमां विवादः ।। 115 ।।

---

1. ' यमेव ' – इति ख – मातृकायाम् ।
2. ' यस्य ' इति ख – मातृकायाम् ।
3. ' तर्हि तथा ' इति ख – मातृकायाम् ।
4. ' तथैव ' इति ख – मातृकायाम् ।
5. ' मात्रमेव ' इति ख – मातृकायाम् ।
6. ' सङ्गतेस् ' इति ख – मातृकायाम् ।

यद्यप्यमुं गुरुपुरे सखि सङ्कुचन्ती
नैवावहेवयस्यभिसरस्यत एव दूरम्
किञ्चैकदापि न तदागममीहसे त्व
सार्थं त्विदं न नितरां मदिराक्षि विद्मः ।। 116 ।।

कृष्णप्रिये, सखि तदाप्यधुनाममानु –
रोधादमुं स्मर स एतु[1] सुखं तनोतु ।
नावस्ति ते गुरुजनागमनावकाशो
मत्संश्रयोत्थमपि खेदमपाकरोतु ।। 117 ।।

इत्यर्थिता सरभसं वृषभानुकन्या
सन्यायमाह नयमाह सनीयतां माम् ।
ब्रूषे यथैव करवाणि तथैव नो चेत्
प्रेमैव धास्यति रुजं चिरमात्तलज्जा[2] ।। 118 ।।

वृन्दारकेऽथ भगवन् मदभीष्टदेव
श्रीभास्कर त्रिजगदीक्षणसौख्यदायिन् ।
मत्सर्वकामद कृपामय पद्मिनीश
सत्यानृताद्यखिल साक्षितया प्रतीत ।। 119 ।।

गान्धर्तिका– गिरिधरौ भवतः सदैका –
वात्मानमात्ममनृतौ न यदि प्रथास्ति ।
सम्प्रत्यसौ गिरिधरोऽपि[3] तदाददानो
मन्नेत्रयोः परिचयं स्वमुदेभ्युदेतु ।। 120 ।।

---

1. ' एत्य ' इति ख – मातृकायाम् ।
2. ' मा तु लज्जा ' इति ख – मातृकायाम् ।
3. ' धरोऽत्र ' इति ख – मातृकायाम् ।

उक्त्वेदमेव [1] वृषभानुसुतात्मकान्तं
ध्यातुं समारभतमीलितनेत्रपद्मा [2]।
सा योगिनीव विनिरुद्धहृषीकवृत्ता [3]
वास्ते स्म यावदविखण्डितमौनमुद्रा ।। 121 ।।

तावद् विहाय सहसैव हरिः स योषिद्
वेशं सखीः समखिलाः परिचिन्वतीस्ताः ।
भ्रूसंज्ञयैव विदधन्निजपक्षपाते
चुम्बन् प्रियां मुहुरवारितमालिलङ्ग ।। 122 ।।

रोमाञ्चिताखिलतनुर्बलदश्रुसिक्ता
ध्यानागतं तमवबुध्य बहिर्विलोक्या ।
आनन्दलीनहृदया खलु सत्यमेव
योगिन्यराजत निरञ्जनदृष्टिरेषा ।। 123 ।।

संज्ञां क्षणादलभताथ पटाञ्चलेन
वक्त्रं पिधाय सुदृगा तनुते स्मलज्जाम् ।
तं प्राह सैव ललिता किमहो विलासिन्
नागा अलक्षितमिह त्वमतीव चित्रम् ।। 124 ।।

अन्तःपुरे कुलवधूकुलमात्रगम्ये
शक्तो न यत्र पवनोऽपि हठात् प्रवेष्टुम् ।
तत्रैति यस्तु गतभीः पुरुषः स एष
गण्यो ऽतिसाहसिकशेखर एक एव ।। 125 ।।

---

1. ' उत्केदमेव ' इति 'क' – मातृकायाम् ।
2. ' युग्मा ' इति ख – मातृकायाम् ।
3. ' वृत्तिम् ' इति क – मातृकायाम् ।

तत्रापि मद्विधसखीजनपालितायाः
साध्वीकुलाप्लवनकीर्तिसुरापगायाः ।
स्नात्वैव मित्रयजनाय कृतासनाया–
स्तं ध्यातुमेव विनिमीलितलोचनायाः ।। 126 ।।

अङ्गं बलात् स्पृशसि यद् वृषभानुपुत्र्या
देवात् ततो दिनपतेरपि नो बिभेषि ।
स त्त्वं किमत्र गणयिष्यसि लोकधर्मौ
लज्जा तु केयमिति तां नहि पर्यचैषीः ।। 127 ।।

तन्माधवाद्य तव दिष्टमहं स्तुवेय
भार्या गृहेऽस्ति नहि, नापि पतिः स कोऽपि
सख्योऽबला वयमहो करवाम किं ते
भद्रेण लम्पटवर त्वमितोऽवितो भूः ।। 128 ।।

कृष्णो ऽ ब्रवीत् किमपि नैव दधामि मन्तुं
गोशालचत्वरमनुसृतखेलनो ऽ हम् [2] ।
दैवात् समस्मरमिमामथ सद्य एव
दैवेन केनचिदवागमितो ऽ प्यभूवम् ।। 129 ।।

राधाभ्यधत्त ललिते क्व नु वर्ततेऽसौ
देवी प्रतीतिमुपयाति विलोक्य नो वा ।
देवी तु दीव्यति दृशैव गताधिवेतत्
धामान्तरे ऽ त्र मुदमातनुते ततो वा [3] ।। 130 ।।

---

1. ' दार्या ' इति 'ख' – मातृकायाम् ।
2. अत्र छन्दोभङ्गश्चिन्त्यः ।
3. नः इति 'ख' – मातृकायाम् ।

देवीति कां भणसि तां परिचाययात्रे –
त्युक्तां सखीं हरिरथाववद् ब्रुवाणाम् ।
आं ज्ञातमद्य ललिते खलु धूर्तता वो
त्यक्तेयतैव [1]समयेन बभूव दिष्ट्या ।। 131 ।।

काप्यत्र सिद्धवनिता किमु खेचरी वा
देवीसमेति तत एव गृहीतविद्या ।
मामत्यवश्यमियमात्मवशे विधाय
दासीयति प्रतिदिनं प्रसभं विकृष्य [2] ।। 132 ।।

सेवाद्य मह्यमपि कञ्चन [3] मन्त्रमेकं
राधे ददातु भव भामिनि मे सहाया ।
शिष्यं त्वमेव कुरु मामथवा प्रपन्न –
मुत्कण्ठितं रहसि कुत्रचनापि नीत्वा ।। 133 ।।

वश्येव राजतितमामतिसिद्धविद्या
यां कां तवानयति साधु सतीः पुरस्त्रीः [4] ।
तां चापि चोरयसि यर्हि तदागतिर्मे
का स्यादतो नहि तयापि सदार्थसिद्धिः ।। 134 ।।

देवी ह्रिया तव गृहान्तरितास्ति लीना
त्वामेव मन्त्रमुपदेक्ष्यति सा कथं वा ।
उत्कण्ठसे तदपि चेत् प्रविश स्वयंभोः
सा चेद् दयेत भविता तव कार्यसिद्धिः ।। 135 ।।

---

1. ' त्यक्तेयमेव ' – इति 'क' – मातृकायाम् ।
2. ' प्रकृष्य ' इति 'ख' – मातृकायाम् ।
3. ' किञ्चन' इति ख – मातृकायाम् ।
4. ' पुरन्ध्री' इति 'ख' – मातृकायाम् ।

इत्यच्युते विशति वेश्म जगाद राधा
किं तत्त्वमत्र सखि मां वद संशयानाम् ।
राधे, न सङ्कुच, चल प्रविशाम तस्याः
सख्यास्तवात्र हरिणा कलयाम सङ्गम् ।। 136 ।।

आलीषु मन्दहसितामृतवर्षिणीषु
कृष्णोक्तिपाटवमथोदभिनत् तदुक्तम् ।
हृदवप्रमन्वधिततर्कतरुस्ततोऽस्या
ऋद्धः [1] फलं बहुरसं निखिलावबोधम् ।। 137 ।।

अन्तर्दधे बहिरगादथवात्र देवी
तन्मार्गणाय तदितस्त्वरया प्रयामः ।
विद्यां त्वमेव सखि तामुपदिश्य कृष्णं
आनन्दयेति सहसा निरगुस्तदाल्यः [2] ।। 138 ।।

तत्प्रेम सम्पुटगतैर्नवकेलिरत्नै –
स्तौ मण्डितावजयतां रतिकान्तिकोटी : ।
सन्तो ऽपि यच्छ्रवणकीर्तनचिन्तनाद्यै –
स्तौ प्राप्तुमुन्नतमुदः सततं जयन्ति ।। 139 ।।

षट्शून्यऋत्ववनिभिर्गणिते तपस्ये
श्रीरूपवाङ्मधुरिमामृतपानपुष्टः ।
राधागिरीन्द्रधरयोः सरसोस्तटान्ते
तत्प्रेमसम्पुटमविन्दत कोऽपिकाव्यम् ।। 140 ।।

**इति श्रीविश्वनाथचक्रवर्तिविरचितं प्रेमसम्पुटाख्यं काव्यं समाप्तम् ।। [3]**

---

1. ' राद्ध ' इति ख – मातृकायाम् ।
2. ' तदान्याः ' इति ख – मातृकायाम् ।
3. ' इति श्री प्रेमसम्पुटाख्यं काव्यं समाप्तम् ।
   इदं प्रेम सम्पुटपुस्तकं श्रीकृष्णदासस्य ।।
   इति ख – मातृकायाम् ।

# घटकर्परकाव्यम्

अभिनवगुप्तकृतकुलकविवृत्या

तारानाथकृतटीकया च समेतम्

**अपूर्वः कोऽयं ते वरद शिरसः शेखरविधि**
**र्ननु ज्ञातं प्लुष्टं स्मरघनुरिदं मूर्धनि धृतम्. ।**
**यदालोकाल्लोके विषमविशिखः स्फूर्जतितरा**
**मिति प्रोक्ते देव्या गलित नियमः शम्भुरवतात्.. ॥1॥**

**(वि0)** इदं प्रोषितप्रमदया हेतुभूतया प्रोषितप्रमदामुद्दिश्य कथ्यते कुलकम्. तत्र किञ्चित् कविनिबद्धप्रमदावक्तृकम्, किञ्चत् कविनिबद्धतत्सखीभाषितम्, किञ्चित् कविनिबद्धदूतीभाषितम्, अन्यत् कविप्रकटितप्रतिदूतीवचनम्, इतरत् स्वतन्त्रकविकथितम्, इति बहुप्रकारं दर्शयिष्यामः; नतु सैव एका कथनकर्त्री. प्रोषितः प्रमदो वल्लभो हर्षश्च यस्याः; अथ च प्रोषितवल्लभेन वियुक्ता, प्रकृष्टेन यौवनेन शृङ्गारजनितेन मदेन च युक्ता. अन्यदेशतया वियुक्तत्वमेव प्रोषितत्वेन लक्ष्यते.

**छादिते दिनकरस्य भावने**
**खाज्जले पतति शोकभावने. ।**
**मन्मथे च हृदि हन्तुमुद्यते**
**प्रोषितप्रमदयेदमुद्यते ॥2॥**

दिनं करोतीति दिनकरस्तस्य भावने रश्मिपुञ्जे छादिते तिरस्कृते सति तासां तमः प्रतिपक्षतया सुप्रसिद्धानामपि न न सति तन्मनाः स सूर्यो यत्र आच्छाद्यते तत्र कथं हर्षालोकोऽपि मानसेऽस्तु, अथच विरहिणीनां रजनिसमयजनितरणरणककलुषितहृदयानां कदाचित् दिनमपि विविधविनोदनालोकवितरणेन बन्धुतां यायात्. अद्य तु यत्प्रसादात् तादृशदिनं प्रजायते तस्य अपि कश्चिदात्मीयः सहजः स्वभावः, सोऽपि आच्छादित इति सातिशयं भाग्यहीनत्वं द्योतितम्. तथा जले च आकाशात् पतति. कीदृशि. शोकं भावयति. जलं हि निकटवर्तिना पार्थिवरजसा

पार्थिववरजन्तोरात्मानं भावयति एकतया योजयतीति श्रुतमिदम्, अद्य तु अपूर्वं वर्तते शोकेन विरहिणीर्भावयति शोकमय्य एव सम्पाद्यन्ते ताः. नहि तासां प्रावृट्समयमध्ये प्रियागमनशङ्कामात्रमपि अस्तीति तावत्काले नैराश्यमेव. खात् पतंतीत्यनेन अमुष्य दुष्प्रसहस्य अप्रतीकारतया सातिशयोऽनुतापः सूच्यते. तथा मन्मथो हृदयप्रहरणं प्रति ससंरम्भः. अथच बाह्यो यः कश्चित् हन्ता तस्मादुपायैः पलाय्यतेऽपि, अयं पुनर्हृदयावस्थित एव अन्तर्हननं प्रति ससंरम्भः. चशब्द एककालतासूचकः. यथा कश्चित् दुर्जनो निर्जने निरालोके दुर्दिन एव सशोके जनमत एव निरुध्यमानमेकाकिनं प्राप्यैव लब्धच्छिद्रः प्रहरति, तथैव अमुष्मिन् काल ईदृशमिव कामिनीजने मदनस्ताडयतीत्यर्थः.

《ता》 प्रोषितप्रमदया विदेशगतभर्तृकया इदं प्रागुक्तं सर्वत्र उच्यते. दिनकरस्य रश्मिसमूहे छादिते पिहिते सति 《न》 केवलं भावने छादिते सति किन्तु खादाकाशाज्जले पतति किं विशिष्टे शोकभावने शोको विरहस्तं दुःखं भावयन्ति प्रतिपादयन्ति शोकभावनं तस्मिन् न केवले जले पतति मन्मथे च हृदि आधारे हन्तुं मारयितुं व्यवसिते सति.

《टि》 तारानाथटीकायां षष्ठोऽयं श्लोकः.

**सर्वकालमितिवाह्य तोयदा**
**आगताः स्थ दयितो गतो यदा ।**
**निर्दयेन परदेशसेविना**
**मारयिष्यथ हि तेन मां विना** ॥3॥

《वि०》 इयं नायिकाया एव उक्तिः. हे तोयदाः! मच्छोक भावकजलवितरणोद्यता यत्र वयं प्रियवियुक्ता न अभूम, तादृशं कालमतिवाह्य यत्र क्वचित् यापयित्वा यदा अद्य दयितो गतस्तदा

यूयमागताः; तथा सर्वं कालं दिष्टमथच कृतान्तरूपं येषां ते तथा मतिबाह्या अमनोज्ञमनसः पीडकत्वात् ते च तोयदाश्चेति विग्रहः . अतश्च मां मारयिष्यथ, काक्वा उक्तिः . एवं नाम पुण्यभागिनी भूयासं, येन दयितजनविरहिता भीषणभवदीयचरितावलोकनपरिखिन्नहृदया जीवितत्यागेन अपि सुखमासीना ; अथच दयितेन विना या जीवति सा अवश्यवधार्हैव. यश्च निर्दयः सन् परदेशं सेवते, स चेत् दयिताया हृदयं प्रविष्टः, तत्करतलोपनतमेव मरणम् . नहि असौ जलधरसमये किमपि कार्यं कर्तु समर्थ इति अवश्यमेक एव क्वचन चिरमास्ते इति. तस्मादस्मासु उपरि प्रेम तावदास्ताम् ; दयामपि यदि अकरिष्यत्, तदवश्यमिहैव आगमिष्यदित्येतावती कष्टपरम्परेति अनेन विश्वासपरिपाटीजनितदौःस्थित्य सूचकेन ध्वन्यते.

**(ता) अहो तोयदाः हे मेघाः यूयम् आगताः स्थ. यदा यस्मिन् काले दयितो वल्लभो गतः विदेशस्थः. किं कृत्वा आगताः सर्वकालमवलङ्.ध्य अतिक्रम्य** अतिवाह्य. ह इति कष्टम्. मां मारयिष्यथ विनाशयिष्यश. कथं विना. केन प्रियतमेन. कि भूतेन ? निर्घृणस्तेन पुनरपि कीदृशेन परदेशसेविना परदेशं सेवितुं शीलं भावो यस्य सः परदेशसेविता तेन ।.

**(टि0)** तारानाथटीकायां सप्तमोऽयं श्लोकः.

"सर्वकालमवलङ्.ध्ये" ति पाठान्तरं तारानाथेन गृहीतम्."निर्दयेन" इत्यस्य स्थाने "निर्घृणेन" चेति.

**(वि0)** प्रियतमं प्रति निजावस्थां जिज्ञापयिषुर्भीषणजलदविजृम्भामसहिष्णु र्युक्त्या कथंचिद्वचनात् यदि अमी देशातरं व्रजेयुस्तत् सर्वं सम्पत्स्यते. प्रियतमोऽपि च तद्देशप्राप्तजलधरध्वानाकर्णनेन कदाचित् मदीयामवस्थां स्वयं वा अनुभवेदपि,इत्यभिप्रायेण नायिका इदमाह

**ब्रूत तं पथिकपांसुलं घना**
**यूयमेव पथिशीघ्रलङ्.घनाः ।**
**अन्यदेशरतिरद्य मुच्यतां**
**साथवा तव वधूः किमुच्यताम्** ।।41।।

**वि0** हे घनाः ! मेघाः, अथच अतिनिविडाः, अत एव हननशीलाः, तं पथिकानां मध्ये पांसुलं निर्मर्यादं निर्दयं ब्रूत. एतदेव तस्य अभिज्ञानं यत् पथिकेषु मध्ये स एव निर्दय इत्यर्थः. यतो यूयमेव पथः शीघ्रं लङ्.घथेत्यनेन कथमितः क्षिप्रं व्रजेयुरिति प्रोत्साहना ध्वन्यते. ब्रूतेति च अध्येषणा इयम्, लङ्.घने च चिरव्रजितस्य अपि झगिति आसादनम्. प्रियतमो हि चिरकालं प्रोषितः, स कथं यो मार्गं लङ्.घयितु न शक्तस्तेन अद्य इतश्चलितेन लभ्येतेति भावः. किं ब्रूत. अन्यस्मिन् देशे या इयं रतिर्विना अपि कार्यमासक्तिः, अथच वल्लभान्तरेण सह प्रेमविस्रम्भो नहि अन्यथा अम्बुधरकालोऽतिवाह्य इति, सा रतिर्मुच्यताम्. अवश्यं हि तया रत्या भवान् ग्रथित एवेति उपालम्भगर्भा उक्तिः. अद्येति अद्यैवेत्यर्थः अथ कथं प्रेम सविस्रम्भे शिथिलयितुं शक्यस्तर्हि सा तव वधूर्न पुनः प्रियतमा, अपितु शास्त्रसमयपत्नी. किं कथ्यतां न वयमप्रियमावेदयामः, निश्चितं तु प्राणान् नैव धारयेत्. अथवा साथवा तव वधूरित्येतावत् सन्देशवचनमभिधाय किमहं कथं वा भवेयमिति किमलीकविकत्थनेनेति अवश्यमेव न जीवामीत्यर्थः.

**ता0** हे घनाः हे मेघाः तं पथिकं यूयमेवं ब्रूत वदत. किं विशिष्टं पथिकं पांसुलं पांसुर्धूलिः तं लाति आदत्ते इति पांसुलः पुंश्चलः पथिकश्चासौ पांसुलश्च पथिकपांसुलस्तम्. किं विशिष्टा घनाः पथि शीघ्रलङ्.घनाः. किं वदत यथा हे पथिक अन्यदेशरतिरद्य मुच्यताम्. अन्यदेशरतिः अन्यदेशनिवासः. क्व अस्मिन् वर्षासमयेप्रावृषि मुच्यतां त्यज्यताम्. अधुना नागच्छसि चेत् तदा सा तव वधूः किमुच्यतां किं कथ्यतामित्यर्थः.

**हंसपङ्क्तिरपि नाथ सम्प्रति**
**प्रस्थिता वियति मानसं प्रति.।**
**चातकश्च तृषितोऽम्बु याचते.**
**दुःखिता पथिक सा प्रिया च ते..** ॥5॥

**(वि)** यदि पुनरद्य मार्गे गमनमागमनं च न युज्यते इति शङ्क्यते, तदेवं ब्रूतेति नायिका आह पथिक ! नहि भवान् नित्यं पथा गच्छति, अतो यदा तद्देशगतोऽभूत् तदा सा प्रिया श्रूयते स्म. अतश्चातकस्तृषाक्रान्तो जलं याचते, सा च तव याच्ञां करोति. अनेन चातकयाच्ञां प्रति जलस्य कारकता. त्वं तु तदीययाच्ञां प्रति न कारकः. स हि याच्ञां प्रति कारको भवति, यः कदाचिदाशापूरणं करोति. त्वं तु सर्वकालमेवंविधप्रतिकूलाचरणवचञ्चुरेव. तथापि तु याच्यसे. अत एव आह न प्रभुः पर्यनुयोगाहः. हंसानां सम्बन्धिनी पङ्क्तिरतिबहवोऽपि हंसा अद्य आकाशमार्गे मानसं प्रति प्रचलिताः एकोऽपि हि यत्र गच्छति, तत्र अवश्यमपरस्य अपि अनिरुद्धेन पथा भाव्यं; किं पुनर्बहवः. यतश्च तस्य यदेकायतनमाकाशं तदेव हंसानां मार्गत्वेन वर्तते. भूमौ मार्गे को भयसम्भवः. यत्र च अतिदूरं मानसं गन्तुं निर्बुद्धीनामपि हंसानामुद्यमः, तत्र परिमितदेशनिवृत्तिमात्र एव न किमिति सा प्रिया भवतो याचते.

**(ता)** हे घनाः हे मेघाः तं पथिकं यूयमेवं ब्रूत. हे पथिक, आस्तां तावदन्यो बुद्धिमान् जनः. हे नाथ स्वामिन्. हंसपङ्क्तिरपि प्रस्थिता, मानसं प्रति मानसरोवरं लक्ष्यीकृत्य. क्व वियत्याकाशे. अन्यच्च चातकोऽपि तृषितोम्बु याचते चातको जलवाहकः सारङ्गो जलकोकिलः. याचते भिक्षते. किम्? अम्बु सलिलम्. किम्भूतश्चातकः ? तृषितः पिपासितः सन्. दुःखिता पथिक सा प्रिया च ते. हे पथिक हे पान्थ. प्रिया च ते तव प्रिया सा दुःखिता वर्तते जननिविरहेणेत्यर्थः.

**(टि.)** तारानाथटीकाप्यामयं नवमः श्लोकः.

जननिविरहेणेति चिन्त्यम्. स्वजनविरहेणेति पाठः साधीयान्.

**नीलशष्पमभिभाति कोमलं**
**वारि विन्दति च चातकोऽमलम्।**
**अम्बुदैः शिखिगणो विनाद्यते**
**का रतिः प्रिय मया विनाद्य ते॥ 6॥**

**(वि.)** नीलं शष्पाख्यं तृणं सर्वतो भाति, चातको निर्मलं जलं विन्दति जलं लभते, मयूरकुलं च मेघै केकायुक्तं क्रियते, इत्येतैर्वाक्यैः प्रत्युत इह आगच्छतस्तव किमपि पथि मनोहरत्वमिति ध्वन्यते. नीलं च शष्पमवलोकय तस्तत्सुकुमारतरस्पर्शानुभवसुखितचरणयुगलस्य गगन निपतितामलजलदलितक्लमस्य मुदितमयूररचितकेकाकरणनिर्भर विकस्वरकर्णद्वयस्य अवश्यं सर्वमेव सुखम्. अद्य तु तूष्णीं स्थितस्य मया विना का रतिः, न काचिदिति स्वात्मसौभाग्यसंभावनागर्भा इयमुक्तिः अथच मम ईदृशी अवस्था यतो वर्तते, ततो मां प्रति शष्पं नीलं मलिनस्वभावमपि कोमलं करुणार्द्रमिव भाति. चातकश्च यो नाम्नैव प्रियगगनजलः प्रसिद्धः, सोऽपि जलमिह लभते, न तथा पिबतीति प्रतीयमाना उत्प्रेक्षा. अम्बुदैश्च विरहिहृदयस्फोटनपटुतरगर्जितैरपि ममोपरि करुणावशात् निजसुहृत्कुल माक्रन्दवत् सम्पाद्यते. का पुनर्मया विना मम अभावे का अरतिः कः खेदः, न कश्चित्. तथा मम अभावे भवतः का इयं रतिः कोऽयमनुबन्धः, सा म्रियतामिति. अथच प्राङ्.मया विना तव रतिर्न कदाचिदभूत्, अद्य तु कथं सा रतिः अद्येत्यनेन प्रागत्यन्तप्रेमरसमानसतां कपटेन किल प्रकटितवानसीति ध्वन्यते. अत एव सोत्प्रासं प्रियेति आमन्त्रणमिति उपालम्भगर्भा भणितिः.

**(ता.)** अतिभाति अतिशयेन शोभते. किम्? नीलशष्पं नवतृणम्. किं विशिष्टं सुकुमारम्. न केवलं नीलशष्पमतिभाति, अपि च विनाद्यते. कोऽसौ ? शिखिगणो मयूरसमूहः. कैः? अम्बुदैः मेघैः. हे प्रिय अद्यास्मिन् काले मया विना तेन का रतिः का प्रीतिः का प्रिया.

**(टि.)** तारानाथटीकायां दशमोऽयं श्लोकः.

**मेघशब्दमुदिताः कलापिनः**
**प्रोषिताहृदयशोकलापिनः।**
**तोयदागमकृशा च साद्य ते**
**दुर्धरेण मदनेन साद्यते ॥ 7 ॥**

**(वि)** अभी ये भवता पुरः परिदृश्यन्ते कलापिनस्ते मेघानां सेचनप्रधानानां सम्बन्धिना शब्देन मुदिताः केकाप्रियत्वात्, तथाच प्रोषितानां कान्तानां सम्बन्धिनि हृदये शोकं लापयन्ति सम्यक् श्लेषयन्ति अवश्यं, तथा प्रोषितानां हृदये शोकं लपन्ति तेषु हि कूजत्सु अवश्यं विरहिण्यः शोकवत्य इति निश्चीयते, तथा प्रोषिताहृदयं शोकेन लापयन्ति द्रवीकुर्वते. सा च ते प्रिया तावकी प्रिया अथच तव दुर्धरेण कामेन पूर्वं हि कामभयभीता यास्त्वमेव शरणमभूः, अद्य तु इह स्थितस्य तव मदनो दुर्धर इति दुर्निवारः सम्बन्धमात्रे षष्ठी, नतु कर्तरि खलर्थ. (2/3/69) इति प्रतिषेधात्. तथा तवैव सन्निहितस्य सा तोयदागमे कृशा अभूत्. आगमिष्यति जलधरसमयः प्रवत्स्यति च प्रियतमः इति रणरणकवती भवत्सन्निधाने कृशा बभूव. अद्य तत्र मध्ये भूयान् कालो गत इति अस्या अद्य हितेन भवितव्यमिति कविनिबद्धदूतीवचनमिदम्. नहि मेघानां स्वयमेव "मेघशब्दमुदिताः" इति "तोयदागम0" इति च स्वातन्त्र्येण कथयितुमुचितम्. "अम्बुदैः शिखिगणो विनाद्यते" इत्यत्र तु प्राक्तनश्लोके मेघमुखसञ्चारिताक्षरा नायिका एव कविना वक्तृत्वेन उपनिबद्धा, इह तु नैवम्.

**(ता.)** अस्मिन् काले भवति कं कलापिनः कलां पान्ति चन्द्रिकां रक्षन्ति तानि कलापानि विद्यन्ते येषां ते कलापिनः शिखिनः. कीदृशाः? प्रोषितागतभर्तृकायास्तस्या हृदयम् उरः तत् शोकं लापितुं ग्राहितुं शीलं येषां ते कलापिनः. पुनः कीदृशास्ते ? मेघकृतशब्दमुदिताः घनगर्जितेन तुष्टाः. अपिच अवसाद्यते. का ? तव प्रिया. कीदृशी ? तोयदागमकृशा वर्षाकालदुर्बला. क्व वर्षाकालेनावसाद्यते मदनेन. किं विशिष्टेन? दुर्धरेण दुःसहेनेत्यर्थः. यथा विरहिणी प्रावृषि दुःखिता रोदित्यर्थः.

**टि0** तारानाथटीकायामेकादशः श्लोकः.

**किं क्षमापि तव नास्ति कान्तया**
**पाण्डुगण्डपतितालकान्तया.**
**शोकसागरजले च पातितां**
**त्वद्गुणस्मरणमेव पाति ताम्॥**

**वि.** सख्या एव दूतीत्वेन प्रेषिताया इयं भणितिः. आस्तां तावत् प्रेमानुबन्धः. तादृशी अपि या कान्ता लावण्याद्यसाधारणभूता, सा यदि ईदृशवत् जायते, तत् किं तया हेतुभूतया क्षमा अपि नास्ति. पाण्डुरच्छाययोः कपोलयोः पतिता अलकान्ता यस्याः, तदीयकपोलतलपाण्डिमानं मलिनस्वभावा अलका अपि प्रेक्षितुं न पारयन्तीत्यर्थः . अथच कान्तेति आमन्त्रणमपि. त्वं यदि तस्या वल्लभस्तया ईदृश्या जनमात्रकृपाभाजनभूतया अपि या सामान्यजनस्य कृपा भवति, सापि न अस्ति तव आत्मनि इयतापि पुरुषगुणं बहुमानं वहतोऽपि. तथापि सा शोकार्णवपानीये मेघसमयवारिणा पातिता भवदीयगुणस्मरणेन एव रक्ष्यते. अथच त्वत्तस्तव सकाशात् पतिता शोके, भवद्विप्रयुक्ता च जाता, शोकजलधौ च निमग्ना सम्पन्नेत्यर्थः चकारादेतत् ध्वन्यते, वस्तुतस्तु त्वद्गुणनामेव सातिशयसम्भोगादीनां स्मरणेन एव शोकेपतिता. अद्यतु तथा कृपापात्रतां प्राप्ता, यदुत तेन निष्करुणेन पातिता अपि त्वद्गुणस्मरणेन एव रक्ष्यते. मम किल स प्रियतमोऽपगतो निर्बहुमानो मां प्रति च दृढतरप्रेमपवित्रितान्तःकरणो नूनं मामेव तदवस्थां यथा पूर्वं त्रातवांस्त्वां तथा त्रास्यते इति त्वद्गुणानां स्मरन्ती सा जीवतीति यावत्. तथा योऽयं सागरे पतितः, सोऽपि अवश्यं गुणस्मरणवृत्या एव रक्ष्यते दृढगुणविरचितरज्ज्ववलम्बनेन जातुचिदुत्तरेयमपि, इत्यर्थः.

**ता.** यथा हे मेघाः तं पथिकं यूयं ब्रूत यत् किं कृपापि दयापि नास्ति न विद्यते. कया कान्तया योषिता सह. किं विशिष्टया पाण्डुपतितालकान्तया

पाण्डु च तौ गण्डौ कृपोलौ तयोः पतितालकान्तया कुटिकेशान्तया. अन्यच्च त्वद्गुणस्मरणमेव पाति तां त्याज्यो जीवनोपाय इत्यर्थः. कीदृशीं तां शोक सागरजले अद्य वर्षासु जलपतिताम्. शोकस्य बहुत्वात् सागरजलेनोपमा.

**[टि0]** तारानाथेऽयं द्वादशः श्लोकः. "क्षमा" इत्यस्यस्थाने कृपेति पाठ इह गृहीतः.

**कुसुमितकुटजेषु काननेषु**
**प्रियरहितेषु समुत्सुकाननेषु।**
**द्रवति च कलुषं जलं नदीनां**
**किमिति च मां समवेक्षसे न दीनाम्॥ 9॥**

**[वि]** इयं विलापावस्थां यातायाः स्वयमेव नायिकाया उक्तिः. पुष्पितानि कुटजानि येषु वनेषु याः समुत्सुका उत्कण्ठिता मादृश्यस्तासां यानि आननानि प्रियतमवियुक्तानि तेषु तद्विषये नदीनामपि कलुषं जलं गलति अस्मादृशीनां विरहिणीनामाननानि अवलोक्य जडभावानामपि कलुषं जलं गलति, अस्मादृशीनां विरहिणीसरितां शोकाविलं जलं गलतीत्यर्थः. त्वं मां दीनां किमिति समवेक्षसेऽपि न. चकारावपिशब्दार्थौ भिन्नक्रमौ, एको दीनामित्यस्य अनन्तरम्, अपरस्तु समवेक्षसेशब्दस्य

**[ता.]** हे दूतास्तं पथिकं यूयं ब्रूत अस्मिन् वर्षाकाले मां किमिति न समवेक्षसे नागत्य सम्भावयसि. कीदृशीं माम् ? दीनां कृपणाम्. केषु समुत्सुकाननेषु कीदृशेषु कुसुमितकुटजेषु. कुसुमिताः कुटजा येषु तानि कुसुमितकुटजानि. तेषु कोऽर्थ ? प्रावृट्कालः प्रवर्तत इत्यर्थः. पुनः कीदृशेषु काननेषु समुत्सुकानि उत्कण्ठितानि आननानि मुखानि येषु तानि समुत्सुकाननानि, तेषु केवलं तथाभिधेयेषु नदीनां जले वहति. किं विशिष्टे ? कलुषे अप्रसन्ने ईदृशे काले.

**टि०** तारानाथटीकायामयं त्रयोदशः श्लोकः. उत्तरार्धे "कलुषे जले" इति पाठ इह स्वीकृतः.

**मार्गेषु मेघसलिलेन विनाशितेषु**
**कामो धनुः स्पृशति तेन विना शितेषु।**
**गम्भीरमेघरसितव्यथिता कदाहं**
**जह्यां सखि प्रियवियोगजशोकदाहम् ॥ 10 ॥**

**वि.** विसृष्टायामपि दूत्यां तद्वचनाकर्णनादपि न आगत इति शोकाकुलमनसि नायिकायां यदा कदाचित् सखी तत्समाश्वासनाय इत्थमभिहितवती मार्गाणां दुःसञ्चरत्वादसौ न प्राप्तः, तदा पुनरपि नायिकायाः सखीं प्रति इयमुक्तिः सखि! पश्य, मार्गा मेघसलिलेन नाशितास्तथापरोऽयं दोषःअप्रत्ययेषु मार्गेषु शिता इषवो यत्र तादृक् धनुः स्पृशति, शितं शरं सन्धाय आकर्णाकृष्टं मोक्तुमिच्छतीत्यर्थः. तेन विना तद्वियुक्तायाः अथच यदि अहं तमभिसरेयं, तत् मार्गा दुर्ज्ञानाः, तथाविधेषु अपि तेषु दुःसहं स्मरशरभयं स्मरश्च तद्वर्जं शरान् सन्धत्य मामेव ताडयति, अन्यथा कदाचित् तस्यैव गमनमिह सम्भाव्येत. अथ इहस्था एव जलदसमयमतिवाहयामि, तत् गम्भीरेण घनगर्जितेन जातत्रासा तिष्ठामि. अतो हे सखि! कदा अहं प्रियवियोगजं शोकदाहं जह्याम्. अहं च मेघशब्द्व्यथिता, मदनश्च निशितशरपातनोद्यत इति अवश्यं मम जीवितान्तेन भाव्यम्. तच्च कदा भवेत्, यत्र अहं सकलशोकनिर्मुक्ता, सम्पद्येयेति. केचित् सप्रियेति पठन्तः सहृदयाः कथमद्य अपि सखी दूतीत्वेन विसृष्टा सा अपि न आगता तत् नूनं तत्सम्भोगरसलालसया तया भाव्यमिति सम्भावयन्त्यां नायिकायां कयाचित् वयस्यया मार्गदौरात्म्ये तदागमनविघ्नकारिणि उपन्यस्ते स्वयं नायिकाया इदं सूक्तमिति अभ्यूचुः. मार्गास्तावत् नष्टाः, तेन च विना मदनः प्रहरतीति तन्निकटात् चलितुं न युज्यतेऽस्याः. अथच तत्सम्भोगरसवृत्तिस्मरणेनैव मदनकदर्थनार्हा अतोऽहं

यदि, तत् किल मञ्जरीभिर्भवान् सकलवनमध्ये श्रेष्ठो बहुवीभिः कान्ताभिस्तु परिवृत इति शृङ्.गारिणि भवति बहुमान इत्यर्थः, तथापि सयौवनानां युवतीनां तु नेत्रोत्सवः. यदा किल अहं युवतिः प्रियसंयुक्ता त्वामवलोकितवती, तदा लोकोत्तरनयनानन्दवती अभूवम्, अद्य त्वमेवंविधबहुतरवल्लभापरिवृतो भूत्वा कथं मां प्रियवियुक्तां त्रातव्यां दर्शनमात्रेण अपि मदनपरवशां करोषीति, वाक्यार्थः.

**ता.** हे कामनिवासर्ज ! त्वां भवन्तं यत् ससर्ज सृष्टवान्. कःप्रजापतिः स्रष्टा. सुतरां तत् साधु शोभनं निवसनं निवासः आश्रयः. कस्य? कामस्य निवासः. स चासौ सर्जश्च. सर्जोनाम वृक्षविशेषः, कामनिवासर्जः. कीदृशः त्वं प्रवरः प्रधानः. केषाम्? मध्ये वनानां कामिकत्वात्. प्रवरमञ्जरीभिः कुसुमितलाभिः न केवलं मञ्जरीभिः प्रवरो नेत्रोत्सवश्चासि. नेत्राणाम् उत्सवो नेत्रोत्सवः आनन्दस्त्वं भवसि. केषाम? स यौवनानाम्. सहयौवने वर्तते स यौवनाः तेषां सयौवनानां ससर्जकुसुमानि तरुणां कोरकानि भवन्तीत्यर्थः.

**टि.** ताराचन्द्रेऽयं षोडशः श्लोकः.

**नवकदम्ब शिरोऽवनतास्मि ते**
**वसति वो मदनः कुसुमस्मिते ।**
**कुटज किं कुसुमैरवहस्यते**
**प्रणिपतामि च दुष्प्रसहस्य ते..॥ 11 ॥**

**वि.** यदा सर्जतरोरपक्रान्ता नायिका झगिति कदम्बमवलोकयति, तदा प्राक्तनमदनभयभीतिमती झगिति आह

हे नवकदम्ब ! इदानीमेव अवलोकिताननुभूतत्वदीयप्रतापा अहं तुभ्यं शिरसा अवनता अस्मि. एवं यावत् भणति, तावत् तदीयकुसुमविलोकनजनितरणरणका आह युष्माकं पुष्पविकासे कामो वसति, मया ज्ञातं सर्जस्यैव इदं वैषम्यं यावता त्वमपि एवमेव, सर्वेषामेकयोगक्षेमतेति

साध्या. प्रियेण च सह वियोगः तथा तस्य साध्या. इदानीं यः प्रियस्तेन सह वियोगः, तज्जं शोकदाहं कदा जीवितान्तेन अपि जह्याम्.

**ता.** हे सखि कदाहं जह्यां त्यजेयम्. प्रियवियोगजशोकदाहं प्रियो वल्लभः तस्य वियोगो विरहः तत्. किं विशिष्टाऽहम् ? गम्भीरमेघरसितव्यथिता केषु सत्सु ? मार्गेषु पथिषु, कथं भूतेषु, विनाशितेषु विनाशं प्रापितेषु. केन मेघसलिलेन. अन्यच्चकामः कन्दर्पः धनुः स्पृशति. कथं विना तेन वल्लभेन. किं. विशिष्टं धनुः ? शितेषु शिताः तीक्ष्णाः इषवो बाणा यस्य तत् शितेषु . तेन किमुक्तं भवति वर्षाकाले बलवान् कामः.

**टि0** ताराचन्द्रेऽयं चतुर्दशः श्लोकः.

**सुसुगन्धितया वने जितानां**
**स्वनदम्भोधरवातवीजितानम्।**
**मदनस्य कृते निकेतनानां**
**प्रतिभान्त्यद्य वनानि केतनानाम्.॥ 12 ॥**

**वि.** यदा विनोदनार्थं सख्या उद्यानोपवनं नीता, तदा तद्दर्शनद्विगुणतरोपचितविलापावस्थाया नायिकाया इदं सूक्तम्. केतननाम्नां तरूणां वनानि अद्य विराजन्ते. कीद्शानाम्. सुष्ठु सौरभेण वनमध्ये केनचिदजितानां, तथा गर्जतां मेघानां पवनेन वीजितानां प्रबोधितानाम्. अत एव कामस्य कृते निकेतनानां सङ्.केतधाम्नाम्. अयमभिप्रायः केतनवनानि मदननिवेदशस्थानानीति अतिसुकुमारणि, जलधरसिततद्विमुक्तशीकरासार सहितश्च पवनस्तेषामेव प्रबोधनहेतुतया सुकुमारतामाप्त इति किमत्र जलदसमये मार्गवेषम्यम्, तत् नूनमेव केतनवनावलोकनप्रबोधितमदनस्थान सुखसंस्कारः प्रियतम आगमिष्यतीति सम्भावयन्त्या नायिकाया भणितिः प्रतिभातीति. अपरे तु बनशब्दपौनरुक्त्यममृष्यमाणा मदनस्य अवने रक्षणे कृते अजितानां केतनानां वनानि शोभन्ते इति आहुः. अथवा सौरभेण ये

वने एकान्ते यत्र अपरः परित्राता न सम्भाव्यते तत्र जिता अपहृतधैर्यवृत्यः कृता विमोहिताः केचन विरहिजनाः, तेषां दैववशात् जलधरशिशिरपवन प्रबोधितानामपि पुनरपि एतानि केतनवनानि कामस्य कृते करणाय प्रतिभान्ति मदनातङ्ककरणादृते न एतेषां किमपि प्रयोजनमिति यावत्. स्वनशब्देन करुणावशात् शब्दायमानता ध्वन्यते. यदा स्वनन्तो गर्जनतोऽम्भोधरा यत्र संजातकृपाः संवृत्ताः, तत्र अमीषां केतनवनानां का इयं निष्करुणता.

**(ता.)** यथास्मिन् वर्षाकाले वनानि प्रतिभान्ति. केतकानां किं विशिष्टानां विराजितानां विशेषदीप्तिं प्रापितानां कैः नववारिकणैः नवं च तत् नववारि, तस्य कणैः तैः नववारिकणैः अभिनवजलशीकरैः पुनरपि कीदृशानां स्वनदम्भोधरवातवीजितानाम्. अम्भो जलं तं धारयन्ति इति अम्भोधराः स्वनन्तश्च ते अम्भोधरास्तेषां वाताः समीरस्तेन वीजितानाम्. पुनरपि किं विशिष्टानां निकेतनानां गृहाणाम्. कस्य मदनस्य. वर्षाकाले केतकीकुसुमानि सुगन्धानि भवन्ति ततः कारणात् तत्र काले निवसन्तीत्यर्थः.

**(टि.)** ताराचन्द्रेण पूर्वार्धे नववारिकणैर्विराजितानाम् इति पाठः गृहीतः उत्तरार्धे च केतकानामिति. तस्यायं पञ्चदशः श्लोकः.

**तत्साधु यत्वां सुतरुं ससर्ज**
**प्रजापतिः कामनिवास सर्ज.**
**त्वं मञ्जीरीभिः प्रवरो वनानां**
**नेत्रोत्सवश्चासि सयौवनानाम्** ॥ 13 ॥

**(वि.)** इयमनन्तरवदेव उक्तिः. हे सर्जनामधेय ! प्रजापतिर्यत् त्वां ससर्ज शोभनं तरुं, तत् साधु, यतस्त्वं कामस्य निवासः. काकुरियमेवं ध्वनति प्रजानां किल पत्या अवश्यं प्रजाहितकारिणा भवितव्यम्, एवंविधहृदयदाहवितरणनिःशेषितनिखिलजन्तोः कामस्य निवासभूतं भवन्तं निर्मिमाणेन प्रजापतिना सुष्ठु प्रजापतित्वमुद्दर्शितं, त्वयि दृष्टमात्र एव मम काऽपि व्यथा विजृम्भते इत्यर्थः. अथ एवमपि जानती किमिति मामवलोकितवत्यसीति

सर्वथा मम हताशाया नयनविषयताक्षमं न किञ्चित् समस्तीति बहुवचनेन ध्वन्यते. इत्थमाकारयन्ती एव नायिका यदा कुसुमितं झगिति कुटजमवलोकयति, तदा मन्यते नूनं माममं सव्रतो हि हतभागधेयामपहसतीति तत आह हे कुटज! किमिति अवाङ्.मुखं कृत्वा हस्यते. कुसुमितोऽपि प्रदेशोऽवश्यं धराभिमुखः; यश्च सन्निहित एव परमपहसति, सोऽपि अवाङ्.मुख एव . अतश्च त्वयि उपचीयमाने बहुतरव्यथा. ते दुःसहस्य प्रणाम एव शोभन इति काकुः अत एव ईप्सिततमत्वाभावः सम्बन्धषष्ठ्या व्यज्यते. किंकुसुमैरिति कुत्सितैः परातङ्.कवितरणचतुरैः पुष्पैरवहस्यते इति सोत्प्रासं काक्वा ध्वनितोऽर्थः.

**ता.** हे नवकदम्ब ! ते तव शिरसा प्रणतास्मीत्यर्थः यतः कारणात् ते तवस्मितं हसितं कुसुमस्मितम्. अन्यच्च कुटज किम् अवहस्यते. कैःकुसमैः. यतस्ते निपतितास्मि. अति दुष्प्रसहस्य कथम्भूतस्य अतिशयेन दुःखेन प्रसह्यते सः तस्य अतिदुष्प्रसहस्य कुटजतरोः. तत्र कोऽभिप्रायः. कुटजः प्रावृषि दुःसहो भवति इति.

**टि.** ताराचन्द्रे सप्तदशोऽयं श्लोकः.

**तरुवर विनतास्मि ते सदाहं**
**हृदयं मे प्रकरोषि किं सदाहम्।**
**तव पुष्पनिरीक्षितापदेहं**
**विसृजेयं सहसैव नीप देहम्.. 14**

**वि.** हे नीपाभिधान तरुश्रेष्ठ! तव सर्वकालमहं प्रणता, तत् किमद्य मम हृदयं दाहयुक्तं प्रकर्षेण करोषि. अन्येऽपि तरवो न एवं मा दहन्ति यथा त्वं सर्वकालमभिष्टुतोऽपि, सर्वथा अयं भागधेयविपर्ययः. अथच तव सदा अहं प्रणता येन ईदृशः. उपकारस्त्वत् सम्भाव्यते, त्वदीयपुष्पैर्निरीक्षिता देहं विसृजेयम्. कीदृशम् . अपदेऽकाण्ड एव ईहा दूतीविसर्जनतत्प्रतिपालनमुधा विनोदनप्रभृतयो यस्य तम् . अहं तावत् तादृगुपकारिभवदीयकुसुमावलोकनेऽपि असमर्था, तानि तु यदि महापुरुषतया एवं विधामवस्थां प्राप्तां

मामवलोकयेयुः, तत् चिरवाञ्छितजीवितत्यागमनोरथेन अपि झगिति युज्येयम्. अतस्तव सदा नता अस्मि. न च एवं सम्भावनीयम्अहितो हृदयादाहकारी कथं प्रणम्यते इति यतः किं त्वं हृदयं सदाहं करोषि, काक्वा न एवमित्यर्थः. निजेन एव विरहहुतवहेन मम दाहकेन अपि दग्धस्य किं दह्यते इति सम्बन्धः. यदि तु अहंशब्दपौनरुक्त्यं सहृदयाः क्षमन्ते तदा एवं व्याख्या आपदे विषमविपद्वहनार्थमेव केवलं यो मम देहस्तं त्यजेयमिति. तथा नीप तरु।र तव नता अस्मि. एवमुक्त्वा दुःसहतया द्वितीयवाक्यमाहदाहयुक्तं मम हृदयं प्रकरोषि, पुनरपि विलापवशात् विचिन्त्य ब्रूतेकिं यथा अद्य, तथा सर्वकाले त्वत्पुष्पेक्षिता अहमकाण्ड एव देहं त्यजेयं, काक्वा नेवेत्यर्थः.

**ता.** हे तरुवर नीप कदम्ब ! ते तव सदा सर्वदा विनतास्मि. अहम् एवं विज्ञाय ते मम हृदय किं सदाहं करोषि यतस्तव कुसुमनिरीक्षणे अपदे अप्रस्तावे देहं वपुरहं विसृजेयं परित्यजेयम्. कथम् ? सहसेति. एतेन किमुक्तं भवति ? यथा वर्षाकाले बलवान् भवति नीपः न केवलं .. कौदुः प्रसवोऽपरो नीपोऽपि प्रियरहितानां दुष्प्रसहो भवति.

**टि.** उत्तरार्धे ताराचन्देण "तव कुसुमनिरीक्षणेऽपदेऽह" मिति पाठः स्वीकृतः. तस्यायमष्टादशः श्लोकः.

**कुसुमैरुपशोभितां सिते**
**र्घनमुक्ताम्बुलवप्रहासितैः ।**
**मधुनः समवेक्ष्य कालतां**
**भ्रमरश्चुम्बति यूथिकालताम् ॥15 ॥**

**वि.** अयं भ्रमरो भ्रमणशीलो यूथिकां चुम्बति, मदीयप्रियतमस्तु पथिक एकत्र एव कश्चित् स्थितो मम नाम अपि न अवेक्षतें इति. तां कीदृशीं यूथिकाम् ? सितैर्बर्द्धैर्न तावत् विकसितैः, ततोऽनन्तरं तु घनैर्मुक्तास्त्यक्ता येऽम्बुलवास्तैः करणभूतैः प्रहासितैः कुसुमैरुपलक्षिताम्. अथच घना मुक्ताफलसदृशा ये जलकणाः, तत्कृतानि यानि प्रहासितानि

प्रहासितत्वोत्पादितानि निजछायास्फुरणानि यैः पीतानि अपि सन्ति शुक्लानि जातानि कुसुमानि. किं कृत्वा. मधुनो मकरन्दस्य कालतामत्यन्तपरिपाकरसोत्पनां विलोक्य; अथच यो नायकश्चिरात् कान्तामुपभुड्.क्ते., सोऽपि मधुनः पानगोष्ठयाः कालतामवसरप्राप्तिमवलोक्य परिचुम्बति काल इति मत्वर्थीयाकारान्तोऽपि, तथा सा अपि कान्ता धम्मिल्लपुष्पैर्घनैर्मुक्ताफलैर्विरहस्मरणानन्दादिकोत्पन्नैश्च अम्बुललवैर्वाष्पै र्हर्षचाट्वादिजैः प्रहसितैः सितैर्बद्धैर्व्यामिश्ररूपतया स्थितैः परस्परसंश्लिष्टैरुपलक्षिता भवति किलकिञ्चतचेष्टालड्.कारयोगिनी भवति विशेषतः पानगोष्ठ्यवसरे. यदुक्तं

"शुष्कं मुहुः प्ररुदितं क्षणमश्रुपातः.
क्रोधो मुहुर्हसितमाशु.....

इत्यादि . अत ईदृशी कदा अहं प्रियेण परिचुम्ब्यमाना भूयासमित्यर्थः.

**ता.** भ्रमरो भृड्.गश्चुम्बति आस्वादयति. किम्? यूथिकालताम्. कीदृशीम् ? उपशोभिताम्. कैः ? कुसुमैः पुष्पैः कीदृशैः शुभ्रैः सितैः . पुनः कीदृशैः ? घनमुक्ताम्बुलवप्रकाशितैः घनेन मुक्तं परित्यक्तं तच्च तत् अम्बु. जलम्. तस्य लवाः कणाः तैः प्रकाशितानि, तैः घनमुक्ताम्बुलव प्रकाशितैः. किं. कृत्वा ? समवेक्ष्य दृष्ट्वा. कां कालताम् अवसरम् कस्य वसन्तस्य मधुनः.

**टि.** ताराचन्द्रेऽयमेकोनविंशतितमः श्लोकः.

**निचितं खमुपेत्य नीरदैः**
**प्रियहीनहृदयावनीरदैः ।**
**सलिलैर्विहतं रजः क्षितौ**
**रविचन्द्रावपि नोपलक्षितौ ॥६॥**

**वि.** इदं नायकविसृष्टायाः प्रतिदूत्या वचनम्. मा त्वमधृतिं कार्षीः, मार्गवैषम्यादेव असावियन्तं कालं न आगतः. तथाहि नीरदैर्मेघैरुपेत्य सर्वतोदिक्कं सघड्.ट्य खं गगनं निचितम्. कीदृशैः. प्रियैः प्रियाभिश्च ये

**ता.** हे कुन्दसमानदन्ति ! हंसाः चक्राङ्.गाः द्रवन्ति गच्छन्ति. कस्मात् नदन्मेघभयात्. गर्जन...साध्वसात् अद्याधुना. निशामुखानि चन्द्रवन्ति शशियुक्तानि. तथा शिखिनो मयूराः नदन्ति शब्दयन्ति. कथम्भूताः? नवाम्बुमत्ताः. नूतनजलेन मत्ताः हृष्टाः. एतत् सर्वं कस्मिन् काले ? मेघागमे मेघानामागमे तस्मिन् वर्षाकाले कुन्दसमानदन्ति व्याख्यातमेतत्. चक्राङ्.गोमानसौकस इत्यमरः.

**टि.** ताराचन्द्रेऽयं द्वितीयः श्लोकः.

**मेघावृतं निशि न भाति नभो वितारं**
**निद्राभ्युपैति च हरिं शुभसेवितारम्।**
**सेन्द्रायुधश्च जलदोऽद्य रसन्निभानां**
**संरम्भमावहति भूधरसन्निभानाम् ॥ 17 ॥**

**वि.** रात्रिसमयेऽपि गमनागमने न युज्येते, यतो रात्रिसमये वितारं विगततारापटलं नभो न भाति यतो मेघावृतम् यच्च तया उक्तं "पथिकपांसुलोऽसौ मामुपेक्षते" इति, तदपि न युक्तं; शुभसेवितारमकलुषचरितमपि भगवन्तं हरिं निद्रा अभ्युपैति अशक्नुवती विरहं सोढुं नायकमभिसरति प्रत्युतेत्यर्थः. इन्द्रायुधयुक्तजलदो रसन् शब्दायमान इभानां करिणां पर्वतसदृशानां संरम्भं संरब्धतामावहति समन्तात् दर्शयति. यः किल अतिसुकुमारतया सुप्रसिद्धो जलदः, सोऽपि अन्यानुल्लघङ्.नीयेन शक्रायुधेन वज्रेण सातिशयभीषणः सम्पन्नः सादिना हतानां करिणां सादृश्यमुद्वहतीत्यर्थः अथवा मेघः शब्दायमान इभानां करिणां पर्वतसदृशानां संरम्भं जनयति प्रतिगर्जनशङ्.कयेति तेऽपि क्षुभिताः सम्पन्ना इति सर्वथा सुसकङ्.टाः पन्थानः.

**ता.** हे सखि! तथा निशि रात्रौ न भाति शोभते निशा निशीथिनी रात्रिरित्यमरः. किं तत्. नभः आकाशम्. वितारं विगतास्तारका यत्र तत्. निद्रापचयश्चावभ्युपैति प्राप्नोति. कम् ? हरिम् विष्णुम्. कीदृशं

विहीना वियुक्तास्तेषां हृदयावनीं मनोभूमिं रदन्ति विलिखन्ति. एवं तावत् सर्वतोदिक्कं दुष्प्रेक्षं क्षितौ भूमौ रजः सलिलैर्विहतम्. आस्तां तावदन्यत् सलिलेन अभिभूयते रजोमात्रमपि न अवशिष्टमित्यर्थः.

**ता.** प्रोषितप्रमदयेदमुच्यते इति षष्ठ श्लोकादन्वयः. प्रोषितप्रमदया विदेशगतभर्तृकया सख्या अग्रतः इदं निचितमित्यादि वक्ष्यमाणं चोच्यते. हे सखि! कीदृशि, कुन्दसमानदन्ति! कुन्दपुष्पसमानाः दन्ता यस्याः सा, तस्याः सम्बोधनम्. निचितं व्याप्तम्. आकाशं खम्. कैः नीरदैः. किम्भूतैः नीरदैः. प्रियहीनाहृदयावनीरदैः प्रियेण वल्लभेन हीना रहिता, तस्या हृदयं चित्तं तदेव भूमिस्तं रदति विदारयन्ति. तासां मनोदाहकैरित्यर्थः. किं कृत्वा? निचितमुपेत्यागत्य तथा सलिलैर्जलैर्निहितं स्थापितम्. किं तत् ? रजो धूलिः कस्याम् ? क्षितौ भूमौ. तथा रविश्चन्द्रावपि नोपलक्षितौ सूर्यमृगाङ्कौ मेघैराच्छादितत्वान्न दृष्टौ.

**टि.** ताराचन्द्रटीकाया अयं प्रथमः श्लोकः. "प्रियहीनाहृदयावनीरदे" रिति तत्र पाठः. अभिनवगुप्तस्य पाठश्चिन्यः, छन्दोभङ्गात्.

**हंसा नदन्मेघभयाद्द्रवन्ति**
**निशामुखान्यद्य न चन्द्रवन्ति:**
**नवाम्बुमत्ताः शिखिनो नदन्ति**
**मेघागमे कुन्दसमानदन्ति** ॥ 18 ॥

**वि.** हे कुन्दकुसुमसदृशदशने ! परिवर्जिततताम्बूलादिसम्भोगे ! प्रतिदूत्याश्चैव इयं नायिकां प्रति उक्तिःएवं नाम मेघाः शब्दायन्ते यत् हंसा अपि पलायन्ते, रात्रावपि न सञ्चरणे युज्यते यतश्चन्द्रयुक्तानि तन्मुखानि न भवन्ति, एते च शिखिनो मयूरा उद्गतप्रहर्षवशात् शब्दायन्ते. एतेन तत् प्रत्युक्तं यत्तु नायिकया पूर्वमुक्तं.

"हंसपंक्तिरपि नाथ सम्प्रति."

इत्यादिना मार्गसौकुमार्यं, तदेव हि प्रत्युत रणरणकप्रदीपकं मार्गसङ्कटतां करोतीत्यर्थः.

सुखसेवितारस्तम् अथवा निद्रा कथम्भूता सुखसेविता. सुखेन कल्याणेन सेविता श्रिता . अरं शीघ्रम् अभ्युपैति. तथा जलदो मेघः. संरम्भमाटोपम्. आवहति. क्वाधुना. जलं ददातीति जलदः. कथम्भूतः? सेन्द्रायुधः. सह इन्द्रचापेन वर्तते इन्द्रचापसहितः. किं. कुर्वन्. सन्, गर्जयन्. खम् इभानां गजानां, कथम्भूतानां भूधरसन्निभानां गिरितुल्यानाम्. नभोऽन्तरिक्षं गगनमित्यमरः विष्णु नारायणो हरिःइति धनञ्जयीनाममाला. लघु क्षिप्रमरं द्रुतमित्यमरः. इन्द्रायुधं शक्रधनुरित्यमरः. एतत् सर्वं प्रोषितप्रमदयेदमुच्यते.

**(टि.)** ताराचन्द्रेऽयं तृतीयः श्लोकः.

**सतडिज्जलदार्पितं नगेषु**
**नददम्भोधरभीतपन्ननगेषु।**
**परिधीररवं जलं दरीषु**
**प्रपतत्यद्भुतरूपसुन्दरीषु** ॥ ७ ॥

**(वि.)** प्रतिदूत्या एव इयमुक्तिर्नायिका यदा एवमाह ननु अहमेव तत्र यास्यामीति, तदा तां प्रति. दरीषु गुहासु अपि अन्तःस्थिता या अद्भुतरूपसुन्दर्यस्तासु अपि उपरिजलं पततीति व्यधिकरणसप्तम्यौ. कीदृक् जलम्. सह विद्युद्भिर्जलं ददति ये, तैर्मेघैरर्पितं, न ते जलमात्रं ददति, यावत् विद्युतोऽपि अतिभीषणा अर्पयन्तीति. क्व. नगेषु गिरिषु गर्जन्मेघत्रस्तसर्पेषु. अपरस्य ये त्रासदायिनस्तेऽपि यतो जलधररसितात्. त्रस्यन्ति, तत्र का वार्ता भवादृशीनां मालतीकुसुमसुकुमारमनसामिति तात्पर्यार्थः. अन्यच्च किं भूतं जलम्. दरीषु अन्तः परितः समन्तात् धीरो गम्भीरो रवो यस्य, कन्दरासु अन्तः प्रतिशब्देन द्विगुणीभूत इत्यर्थः तेन एषा अपि आशा न अस्ति तोयदजलपटले गगनात् निपतत् कचन गुहामुरवेऽतिवाह्या पुनरपि गमिष्याम इति.

**(ता.)** निपतन्ति (प्रपतति?) किम्? जलम् केषु पर्वतेषु. कीदृशं जलम् ?

सतडिज्जलदार्पितम्. सह तडिता वर्तते सह. तडित्. स चासौ जलदः तेन अर्पितम्. कीदृशेषु नगेषु. स्वनदम्भोधरभीतपन्नगेषु. स्वनन्तश्च ते अम्भोधराश्च तेभ्यो भीताः पद्भ्यां न गच्छन्तीति पन्नगाः येषु ते. परिधीररवं परि समन्तात् धीरो गम्भीरो रवो यस्य तत्. कासु? दरीषु गुहासु. कथम्भूतासु ? अत्यद्भुतरूपसुन्दरीषु. अत्यद्भुतरूपाः सुन्दर्यो यासु तासु.

(ता.) ताराचन्देऽयं चतुर्थः श्लोकः. पूर्वार्धेऽस्य टीकायां "स्वनदम्भोधरः" इति पाठः.

**क्षिप्रं प्रसादयति सम्प्रति कोऽपि तानि**
**कान्तामुखानि रतिविग्रहकोपितानि।**
**उत्कण्ठयन्ति पथिकान् जलदाः स्वनन्तः**
**शोको विवर्धयति च तद्वनितास्वनन्तः॥ 20 ॥**

(वि.) एवमेताभिरुक्तिभिः प्रियतमागमनं दुर्घटमिति अवगते आस्थाबन्धो नायिकाया विजाघटीतीत्यभिप्रायेण सा एव पुनराश्वाससम्पादनाय अस्य माध्यस्थ्ये विशेषानुद्देशात् तदीयहृदयशोकशिखिशमनशक्तामुक्तिमभिधत्ते कोऽपि अनिर्वर्णनीयपुण्यसम्भारबृंहितः सम्प्रति जलदसमये तानि कान्तामुखानि निरतिशयसौन्दर्यवन्ति रतिविग्रहेण प्रणयकुपितेन सञ्जातरोषाणि तथा यानि तदीयवियोगजनितपाण्डिम्ना अद्य असाधारणघर्मसुन्दराणि क्षिप्रमनायासेन एव प्रसादयति त्वामवश्यं प्रसादयतीति यावत्. ननु न अद्यापि असावागतस्तत् कथमेतत्. आह शब्दायमाना हि जलधराः पथिकान् रणरणकवतः कुर्वन्ति निश्चितं दिनाद्दिनमुपचीयमानजलधरध्वानाकर्णनेन परिवर्धितोत्कण्ठः प्रियतमस्तावदागच्छतीति यावत्. ननु प्रियतमाः कथं शीघ्रं प्रसीदेयुः. आह तद्वनितासु पथिकदयितासु तथा शोको विवर्धति विवृद्धवदाचरति यथा अनन्तः सम्पद्यते. चकारेण एवं ध्वन्यते यत् तदेवं रसितं तासां

शोकविवृद्धौ कारणमिति

(ता.) कोऽपि शब्दः सम्भावने. कोऽपि पुरुषः तानि कान्तामुखानि, भार्यावदनानि. सम्प्रति अधुना. प्रसादयति तोषयति आवर्जयति यावत्. यानि रतिविग्रहकोपितानि. जलदाः स्वनन्तं पथिकानुत्कण्ठयनित. तद्वनितासु पथिकवधूषु अनन्तोऽपरिमाणः शोको वियोगो दुःखं समुद्वहति विवर्धते. प्रोषितप्रमदयेदमुच्यते.

(टि) ताराचन्द्रेऽयं पञ्चमः श्लोकः.

(वि.) अत्र केचिदिति पठन्ति

**तासामृतुः सफल एव हि या दिनेषु**
**सेन्द्रायुधाम्बुधरगर्जितदुर्दिनेषु ।**
**रत्युत्सवं प्रियतमैः सह मानयन्ति**
**मेघागमं प्रियसखि श्वसमानयन्ति ॥ 21 ॥**

अयं श्लोकोऽत्रत्य इव न लक्ष्यते, पुस्तकेषु केन कारणेन गत इति न विद्मः. तथाहि पूर्वश्लोकौचित्यं तावदर्थेन न भजते तासामेव सफल ऋतुर्वर्षाख्यो याति या सेन्द्रायुधैरम्बुदैर्दुर्दिनेषु प्रियतमैः सह रत्युत्सवं मानयन्ति. अन्यथा किल हे प्रियसखि ! मेघागमं श्वसमाः सारमेयप्राया अपि नयन्ति, इति व्याख्यायां प्राक्तने नवे ? यमकमेव दुर्लभम्. दिनदुर्दिनशब्दाभ्यामर्थपौनरुक्त्यमपि दुर्धरम्. यान् अस्तं गच्छन्निनो मार्तण्डो येषु दुर्दिनेषु, इत्यपि व्याख्याने तासामिति अपेक्षितो यदर्थो दुरुपपादः.

तासामिति तु अनपेक्षितयदर्थे पदव्यड्.ग्ये ध्वनौ व्याख्यायमाने उत्तरवाक्यं खण्डं गच्छेत् चर मारेचा न्यथेति ? मध्ये शास्त्रन्यायोचितः काव्यामृतकालुष्यैककारणमध्येतारः कवयः श्वसमा मेघागमं नयन्तीति परमनौचित्यम्. नव एवंविधेन अनौचित्येन कुलकपरिसमाप्तिः क्रियमाणा सहृदयचेतःसु रोमन्थादृते किञ्चित् विदध्यात्. श्वसितीति त्

श्वासस्तद्वदाचरतीति क्विप् ततोऽपि ताच्छील्यादिविवक्षायां चानश्. ततः प्रियसखीशब्देन सम्बन्धः प्रागेव वा तथापि न किञ्चिदर्थस्य पौष्कल्यम्, कष्टकल्पनायासं सत्. क्व. प्रियसखिष्विति सप्तम्या समास इति बहुवचनान्तेऽपि न कश्चित् कृतः सम्बन्धः. अन्यथापाठकरणमपि क्लेशमात्रफलमेव .किञ्च अत्र कर्ता महाकविः कालिदास इति अनुश्रुतमस्माभिः नच अस्य काव्ये तृणमात्रमपि कलङ्.कपात्रमुत्पेक्षितवन्तो मनोरथेऽपि सुप्तेऽपि सहृदयाः. तस्मात् प्राक्तन एव परिसमाप्तिश्लोकः. साच सख्या प्रतिदूतीभूतया नायिकाया आस्थाबन्धदाढ्र्योत्पादना युज्यते. उत्पन्नसमाश्वासा हि हृदयं स्थापयन्ती विप्रलम्भयितुं शक्या स्यात्.

**"आस्थाबन्धः कुसुमसदृशं प्रायशो ह्य.गनानां.**
**सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणाद्धि."**

इतिदृष्ट्या. तेन अस्य परिसमाप्तिधुरोद्वहस्य अपि धुरन्धरत्वमविकलमेवेति. तदिदं युक्तमयुक्तं वेति स्वयमेव विदाङ्.कुरुत सहृदयाः.

**ता.** यथा हे घनास्तं पथिकं यूयमेव ब्रूत. तस्याः स्त्रियः रत्युत्सवः रत्युत्सवे प्रियतमैः सहमानयन्ति भुजन्ति. कस्मिन् काले ? मेघागमे. केषु दिवसेषु? सेन्द्रायुधाम्बुधरगर्जितदुर्दिनेषु शक्रचापजलदस्तस्फुटं न केवलं मानयन्ति, प्रियसखीश्च मानयन्ति, पूजयन्ति, तुल्याः कुर्वन्ति. तासामृतुः सुफला (सुफलः).

**टि.** उतरार्धे "मेघागमे प्रियसखीश्च समानयन्ति" इति ताराचन्देण स्वीकृतः पाठः सुश्लिष्टतरः .

अतः परं ताराचन्द्रटीकाया मातृकायामयं श्लोकः अधिकः प्राप्यते, परन्तु ताराचन्द्रेण अस्य व्याख्या न कृता .

**एतन्निशम्य विरहानलपीडिताया**
**स्तस्या वचः खलु दयालुरपीडितायाः.**
**तं स्वारवेण कथितं जलदैर्न मोघैः**
**प्रत्याययौ सदनभूतदिनैरमोघैः ॥22॥**

**भावानुरक्तललनासुरतैः शपेय**
**मालभ्य चाम्बु तृषितः करकोशपेयम्.**
**जीयेय येन कविना यमकैः परेण**
**तस्मै वहेयमुदकं घटकर्परेण ॥23॥**

कविना औद्धत्यप्रकटनाय सहृदयजनमानसरञ्जनाय प्रतिज्ञा इयमुपनिबध्यते. सञ्जातपिपासः करकोशेन हस्तसम्पुटेन पेयं पानार्हं तावदवसरप्राप्तमपि जलमत्यन्ताभिलाषौत्सुक्ये पातुमदोहयोग्यमपि प्रत्युत आलभ्य दुग्ध्वा सहजप्रेमप्रणयिनीसम्भोगरसैश्च शपेयम्. अत्र शरीरस्पर्श नाख्यस्य उपालभ्भस्य न अतीव स्पष्टतेति "शप उपालम्भेन" (वा.911) इति आत्मनेपदाभावः. येन परेण कविना यमकैर्जीयेय, तस्मै घटकर्परेण जलं वहेयम्. कर्परशब्देन सातिशयक्लेशसमुद्वहत्वमात्मनि उच्यते. अत्र च यमकानां विप्रलम्भशृङ्गाररसातिशयविघ्नभूतानामपि मया तथा अपृथग्यत्ननिर्वर्त्यतया निबन्धः कृतः येन प्रत्युत रसपरिपोषकविशिष्टव्याख्याभिधायिपदपरम्परालाभो यमकैः सम्पन्नः तदुक्तम्.

"रसाक्षिप्तया यस्य बन्धः शक्यक्रियो भवेत्.
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः."

इति एतया च प्रतिज्ञया एतत् परिहतम्.

"ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धने.

शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः..

इति. नहि इयं राजाज्ञा, अपितु रसबन्धविघ्नकारित्वप्रमादः परिहार्यः. अ
च प्रत्युत आत्मपरिपोषकत्वमेव उक्तेन प्रकारेण यमकानामिति. कवीनां
शक्तिरेव बलीयसी, सा एव लोकोत्तरा व्युत्पत्तिरिति अभिधीयते ; नतु
अन्या कविशक्तेर्व्युत्पत्तिर्नाम काचित्. यदुक्तं मया एव रौरवेविचारे

**"न वै दोषा दोषा नच खलु गुणा एवच गुणा**
**निबन्धस्वातन्त्र्यं सपदि गुणदोषान् विभजते।**
**इयं सा वैदग्धी प्रकृतिमधुरा तस्य सुकवे**
**र्यदत्रोत्पादादप्यतिसुभगभावः परिणतः॥"**

इति शिवम्..

**प्रमाणपदमीमांसागगनं वै विराजते।**
**समुच्छलति यत्स्पृष्टः साहित्यामृत सागरः॥**
**कवीन्दोरिन्दुराजस्य ते मच्चित्तविकासकाः।**
**बोधांशवो विगाहन्तां भूर्भुवःस्वस्त्रयीमपि ॥**
**तत्परामर्शधवलमनःकोकनदो मनाक्।**
**काव्येऽभिनवगुप्ताख्यो विवृतिं समरीरचत्॥**

**॥ता.॥** येन परेण कविना अहं यमर्कजीयेय तस्मै घटखर्परेणाहम् उदव
वहेयं तस्य किङ्करो भवेयमित्यर्थः.एतत्प्रतिज्ञादृढीकरणार्थं शपथं प्राह
कविः भावानुरक्तवनितासुरतैः शपेयम्. भावेन चित्तेन
परमार्थेनानुरक्तानुरागयुक्ता सा चासौ वनिता. सुरतानि न प्राप्नुयामित्यर्थः ॥
॥. यदि प्रतिज्ञां न पालयामि. तृषितः पिपासितः करकोषपेय
हस्तपुटपातव्यम् अम्बु जलं चालभ्य अप्राप्य शपेयं शपथं कुर्यान्. इति श्री
घटखर्परकाव्यं सम्पूर्णम्. शुभं भवतु.

**॥टि.॥** जीवेय इति ताराचन्द्रटीकाया मातृकायां भ्रान्तः पाठः.

प्रतिभा प्रकाशन

PRATIBHA PRAKASHAN

(Oriental Publishers & Book-Sellers)

29/5, Shakti Nagar, Delhi-110007